बाधबुद्धिगतिबंधकताविचारप्रारंभः॥

बा०वा०

१

श्रीगणेशायनमः ॥ तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकालेतद्धर्मावच्छिन्नविशेष्यताकतद्वि
शिष्टबुद्धेरनुदयात्तद्वत्त्वावच्छिन्नविशेष्यकसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारताकलौकिक
ज्ञानत्वावच्छिन्नंप्रतिपर्वतत्वाद्यवच्छिन्नविशेष्यताकदेशिकविशेषणतासंसर्गकसंयोगादिसंसर्गावच्छि
न्नवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कंदितनिर्णयत्वेनप्रति
बंधकत्वंकल्प्यते। पर्वतत्वावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकालेऽन्यधर्मावच्छिन्नविशेष्य
ताकतद्विशिष्टबुद्ध्युदयात्प्रतिबध्यतावच्छेदककोटौपर्वतत्वावच्छिन्नविषयताकत्वनिवेशः।सं घ
योगादिसंबंधावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानकालेसमवायादिसंसर्गकविशिष्टबुद्ध्यु
दयात्संयोगादिसंसर्गकत्वनिवेशः। अथसंयुक्तसंयोगादिसंसर्गकज्ञानस्यापिसंयोगसंसर्ग
कतयासंयोगादिसंबंधावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयदशायांतदनुदयप्रसंगः १
किंचित्सांसर्गिकविषयतानवच्छिन्नसंयोगादिसांसर्गिकविषयताकत्वंनिवेश्यतद्वारणेऽव
च्छेदकावच्छेदेनवह्निमत्ताज्ञानाद्यसंग्रहः। तत्रविशेष्यतावच्छेदकावच्छिन्नसंयोगादीनामे

यसंसर्गतयाकिंचित्सांसर्गिकविषयतानवछिन्नसंयोगादिसांसर्गिकविषयताकत्वाभावात्पर्वतत्वा
घवछिन्नतानिरूपितसांसर्गिकविषयतानवछिन्नसंयोगादिसांसर्गिकविषयतानिवेशेपिकालिक
विशेषणतादिविशिष्टसंयोगादिसंसर्गकज्ञानं दुःसंपादमेवेति चेन्न । पर्वतत्वावछिन्नविशेष्यतानि
रूपितायासंयोगादिसांसर्गिकविषयतानिरूपितवन्हित्वावछिन्नप्रकारताकत्वनिवेशात्संयुक्तसं
योगसंसर्गकस्थलेच पर्वतत्वावछिन्नविशेष्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयतायाव
न्हिप्रकारतानिरूपितसांसर्गिकविषयताभिन्नतयाऽनुपपत्त्यभावात् । पर्वतोवन्ह्यभाववानितिबा
वानि धनिर्णयकालेपर्वतोद्रव्यं इत्याकारकज्ञानोदयाद्वन्हित्वावछिन्नप्रकारताकत्वनिवेशः । अनुमा
निकभिन्नेच्छादिजन्यबाधबुद्धिदशायांलौकिकसन्निकर्षजन्यविशिष्टबुद्ध्युदयादलौकिक
त्वनिवेशः । अलौकिकत्वंचनसामान्यतोलौकिकसन्निकर्षजन्यभिन्नत्वं अन्यांशेलौकिकंव
न्ह्यंशेचोपनीतभानस्यासंग्रहप्रसंगात् । किंतुवन्ह्यादौलौकिकसन्निकर्षजन्यभिन्नत्वंवन्ह्या
द्यभाववत्तानिर्णयप्रतिबध्यतावछेदककोटौनिवेशनीयं । ननुचद्दुःसंयोगत्वकूटसंयोगमाद्या

बा॰ वा॰ स रणत्वंलौकिकसन्निकर्षस्यदुर्वचत्वात्कथंलौकिकसन्निकर्षजन्यभिन्नत्वंतथात्वमितिवाच्यं।वन्ह्यादिसंयोग
जन्याभिन्नस्यैवतथात्वात् उपनीतभानस्यवन्ह्यादिसंयोगाजन्यत्वेनानुपपत्त्यभावात्।लौकिकसन्निकर्ष
२ जन्यज्ञानेउपनीतभानादिविषयताविलक्षणलौकिकत्वाख्याविषयताविरहोपस्वीकारेतुवन्ह्यादिवृत्ति
लौकिकविषयताकजन्यत्वंज्ञानांशेवन्ह्यादिप्रकारतायां लौकिकविषयताभिन्नत्वंचानिवेश्यंनतुलौकिकसन्नि
४ कर्षजन्यभिन्नत्वंगौरवात्।अथलौकिकसन्निकर्षजन्यत्वानिवेव्यभिचारवारणायलौकिकत्वनिवेशाबाध अ५
कालेलौकिकसन्निकर्षजन्यसंशयापत्तिः।नचसंशयस्यार्थसमाजग्रस्ततयाकस्यचिज्जन्यतानवच्छे
दकत्वात्तदवच्छिन्नस्यापादानमशक्यंतादृशविशिष्टबुद्धित्वावच्छिन्नंतुनिर्णयात्मकंजायतएवनचैषापत्तिरि
तिवाच्यं।संशयत्वस्यकस्यचिज्जन्यतानवच्छेदकत्वेपिप्रत्यक्षसामग्रीबलात्पर्वतत्वावच्छिन्नविशेष्यता
कवन्हिविशिष्टबुद्धित्वतदवच्छिन्नाभाववद्विशिष्टबुद्धित्वावच्छिन्नस्यापत्त्यैवफलतःसंशयाप ल ३
त्तेः।परंतु।लौकिकसन्निकर्षजन्यसंशयसाधारणलौकिकसन्निकर्षजन्यानिर्णयान्यज्ञानत्वमेवबा
धबुद्धिप्रतिबध्यतावच्छेदकमतोनबाधकालेलौकिकसन्निकर्षजन्यसंशयापत्तिरिति।सैतदत्र।संशय री१

साधारणतादृशधर्मस्य बाधप्रतिबध्यतावच्छेदकत्वेपि उपदर्शितस्थले लौकिकसन्निकर्षादिसामान्यसामग्रीब
लाद्वह्निविशिष्टबुद्धित्ववह्न्यभाववैशिष्ट्यबुद्धित्वावच्छिन्नोभयसत्तो बाधकाभावेन फलतः संशयापत्तेर्वारयि
तुमशक्यत्वात् । तादृशसामान्यसामग्र्याः तादृशप्रतिबध्यतावच्छेदकानाक्रान्तस्य निर्णयस्यैव जनने न बाधा
भावरूपविशेषसामग्रीविरहस्य किंचित्करत्वात् । निर्णयस्थले च विशेषसामग्र्यन्तराभावात् । एतेन सं
शये लौकिकविषयतानभ्युपगमेन लौकिकसन्निकर्षकालीनसंशयेपि लौकिकविषयताशून्यत्वेन त
द्रूपबाधप्रतिबध्यतावच्छेदकाक्रान्त एवेति न बाधकाले तदापत्तिः । अथ लौकिकविषयतायाः संशयेनभ्यु अ६
पगमे तस्य लौकिकसन्निकर्षजन्यतावच्छेदकानाक्रान्तत्वप्रसंगः स्यादिति चेत् का क्षतिः । ज्ञानसन्निकर्षाद
वनुत्पत्तेः । अत एव वन्ह्यादिसंदेहानन्तरं वन्हिं साक्षात्करोमीत्याद्याकारकः न साक्षात्कारित्वग्रहः । लौ
क३ किकविषयतायाः साक्षात्कारित्वव्यंजकत्वादिति । न च लौकिकसन्निकर्षादिकालीनसंशयस्य लौकि
कविषयतापत्ते बाधकाभाव इति वाच्यं । तल्लौकिकत्वावच्छिन्नप्रतितन्त्रकोटिकसंशयसामग्र्याः ज्ञा
यत्या प्रतिबंधकत्वकल्पनात् । संशयप्रसामग्रीदशायां लौकिकविषयताशालिज्ञानसामग्र्यभा

वा॰वा॰

३

भावस्यैव बाधकत्वात् । अथवा लौकिकान्यविषयतेव बाधप्रतिबध्यतावच्छेदिका लौकिकसन्निकर्षजन्यसंश
यत्वलौकिकालौकिकोभयविषयते वा संशये तु तोभयसत्त्वेपि बाधप्रतिबध्यः युज्यते चैतदेव एवं च
त्यलौकिकविषयताशालिज्ञानप्रतिसंशयसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवात् साक्षात्कारित्वं यत्प्र
तिनिर्णयत्वेन हेतुत्वं स्वीक्रियते तस्यैव संशये साक्षात्कारित्वप्रयोजकतया संभवेनान्यथानुपपत्त्यभावात्
सामग्रीप्रतिबन्धकत्वकल्पनायां च संशयानुनिर्णयत्वेन हेतुतायां लाघवस्यातिस्फुटत्वादित्यादिकमपा
स्तं । एतावतापि वह्न्यभावादिनिर्णयानन्तरं लौकिकसन्निकर्षादिघटितसामान्यसामग्रीबलाद्वह्न्या
दिभाने बाधकाभावेन नार्थिकसंशयस्य दुर्वारत्वादिति चेन्नैवं । पर्वतत्वावच्छिन्नविशेष्यतानिरूपितव
ह्न्यादिलौकिकप्रकारताशालिज्ञानं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यभावादिप्रका
रताशालिज्ञानसामग्रीत्वेन प्रतिबन्धकता कल्प्यते । इत्थं च संशये लौकिकविषयतास्वीकारे माना
भावात् साक्षात्कारित्वप्रयोजकत्वावच्छिन्नं प्रति तद्वल्लौकिकविषयताशालिनिर्णयत्वेन हेतुत्वं ना
ङ्गीक्रियते अपि तु लौकिकविषयतया एवेति । न चैवं सति लौकिकसन्निकर्षस्य लौकिकविषयता
यां नियामकत्वात् संशये लौकिकविषयतानभ्युपगमे व्यभिचार इति वाच्यं — — — —

लौकिकसन्निकर्षेन फलेजननीये तदभावप्रकारकज्ञानसामग्र्यभावस्य सहकारित्वाभ्युपगमात् । नन्वेवमपि समुच्च
चयेव्यभिचार इति वाच्यं । तदंशेऽव्याप्यवृत्तित्वज्ञानाभावविशिष्टतदभावप्रकारकज्ञानसामग्र्यभावस्य स
७२ हकारित्वाभ्युपगमेनानुपपत्त्यभावादिति । एवं चन्द्राभाववत्तानिर्णयानंतरं चान्द्रिकदशावोभयसामग्री
सत्वेवन्ह्यादिलौकिकप्रकारताशालिज्ञानं नोत्पादयितुं शक्यते एतादृशप्रतिबंधकस्य प्राबल्यात् । नाप्य
लौकिकवन्ह्यादिप्रकारताशालिज्ञानं तत्प्रतिबंधकबाधबुद्धेः सत्वात् । अन्यादृशतादृशविषयताशालिज्ञानं
बाधकालीनदि द्विजन्म त्वलौकिकमेवेति नानुपपत्तिगंधोपि । लौकिकसन्निकर्षजन्यज्ञानस्य बाधसामान्यप्रतिबध्यतयातदि द्वि
यजन्यलौकिकज्ञानवारणाय लौकिकान्यत्वमानिवेश्यं चाक्षुषादिविशेषबुद्धौ चाक्षुषादिबाधबुद्धेः प्रत्य
गेव प्रतिबंधकत्वं कल्पनीयं । शंखेन पीतोयं नवोरगस्यादि बाधबुद्धिदशायां पित्तादिद्रव्यमंडूकवसांज
नादिदोषवशाच्छंखवंशादौ पीतिमोरगत्वाद्यारोपोदयात्तत्वतादृशतादृशदोषविशेषाजन्यत्व
मपिबाधसामान्याभावकार्यतावच्छेदककोटौ निवेशनीयं । केचित्तु । दोषविशेषजन्यज्ञानेपि लौकिकवि
षयतायाएवाभ्युपगमात् लौकिकत्वनिवेशेनैवतत्र व्यभिचारवारणसंभवाद्दोषविशेषाजन्यत्वस्य न प्रति
बध्यतावच्छेदककोटौ प्रवेशः । न च लौकिकसन्निकर्षं विनैव तादृशास्मर्यमाणारोपोदयाल्लौकिकविषयता

चास्तित्वमितिवाच्यं । लौकिकसन्निकर्षवद्धेदविशेषस्यापि तादृशविषयताभ्युपगमात् । न चैवं भ्रमपि तत्र लौकि
बा०बा० कसन्निकर्षस्य व्यभिचारप्रसङ्ग इति वाच्यं । तादृशारोपानन्तरं पीतं श ×नियामकत्वा× शक्तिरामीत्या धनुव्य
वसायादर्पनतन्तता दृशविषयतायाः प्रामाणिकत्वाद्व्यभिचारवारणाय नायत्याद दोषविशेषाजन्यत्वस्य
८ कारणाव्यवहितोत्तरत्वस्यैव वा सन्निकर्षजन्यतावच्छेदककोटौ निवेशनीयत्वादित्याहुः । प्रतिबध्यकतावच्छे
दककोटौ विशेष्यतावच्छेदकधर्मस्य विशेष्यं निवेशः । द्रव्यं न वह्निमदित्याकारकबाधबुद्धेन पर्वतो वह्नि
मानित्यादिज्ञानाविरोधितया कालिकादिसंबन्धेन तदभाववत्ताज्ञानस्याविरोधितयादौ विशेषणतासं
वि सर्गकत्वनिवेशः । विशेष्यतावच्छेदकसामानाधिकरण्यमात्रावगाहिबाधबुद्धेः तादृशविशिष्टबुद्ध्यवि
रोधितया पर्वतत्वावच्छिन्नत्वीयसांसर्गिकविषयतावच्छिन्नत्वं विशेषणताविशेषीयसांसर्गिकविष
यतायां निवेशनीयं । एवं च पर्वतत्वावच्छिन्नविशेषणतायाः महानसत्वावच्छिन्नविशेष्यताकवह्न्य
भावबुद्धौ संसर्गत्वानभ्युपगमेन पर्वतत्वावच्छिन्नत्वं विशेष्यतायामनिवेशनीयं । प्रयोजनाभावात् । कि
तु पर्वतत्वावच्छिन्नविशेषणतात्वसंयोगित्वादिरूपपरंपरासंबन्धावगाहिज्ञानवारणाय विशेष्यतानि
रूपितत्वमात्रं तादृशविशेषणताविशेषीयसांसर्गिकविषयतायां निवेशनीयं । वस्तुतो वास्तवपर्वतत्वा

कत्वविषयतानिवेशो यत्र पर्वतत्व

सभावप्रतियोगितावच्छेदकत्वाभावघटितस्य भवेत्तेनाभावान्तरावगाहिज्ञानं तदसंग्रहप्रसंगः। तादृशज्ञानस्य
वास्तवपर्वतवृत्त्यभावप्रतियोगितावच्छेदकत्वाभावघटितपर्वतत्वव्यापकत्वानवगाहित्वात्। एवं यत्र पर्वतत्वा
दिनामकज्ञानसमेव संसर्गघटकतया भासते तत्स्याप्यसंग्रह इति। पर्वतत्वावच्छिन्नसांसर्गिकविषयतावच्छिन्ना
धेयत्वसांसर्गिकविषयतात्वेन रीत्या व्यापकताघटकपदार्थघटकविषयता एव निवेशनीयाः। इत्थं च तादृश
सांसर्गिकविषयतायां विशेष्यतायां वा पर्वतत्वावच्छिन्नत्वं निवेश्यत इत्यत्र विनिगमकाभावेनोभयत्रैव त
न्निवेश इति ध्येयं। नीलपर्वतत्वावच्छेदेन वन्ह्यभाववत्तानिर्णयस्य शुद्धपर्वतत्वसामानाधिकरण्येन वन्हि
विशिष्टबुद्धिं प्रत्यविरोधितया पर्वतत्वान्यधर्मानवच्छिन्नत्वं तादृशसांसर्गिकविषयतायां वा निवेशनी
यं। न चैवं सामानाधिकरण्यमात्रावगाहिवन्ह्यभावादिमत्ताज्ञानस्यैतादृशप्रतिबंधकतावच्छेदकानाक्रा
न्ततया तादृशज्ञानदशायामवच्छेदकावच्छेदेन वन्ह्यादिविशिष्टबुध्यापत्तिरिति वाच्यं। अवच्छेदकावच्छेदे
न विशिष्टबुद्धिं प्रति सामानाधिकरण्यमात्रावगाहिबाधनिर्णयस्य प्रतिबंधकत्वान्तरकल्पनात्। सं
योगादिसंसर्गकविशिष्टबुद्धौ समवायादिसंसर्गावच्छिन्नप्रतियोगिताकाभाववत्तानिर्णयस्य चा
विरोधितया संयोगादिसंसर्गावच्छिन्न च वन्हित्वाद्यवच्छिन्नप्रतियोगिताकत्वं निवेशः। द्रव्यत्वाद्यव

दि
बा०प्र०वा० ञाभाववत्तानिर्णयस्य तदभावव्याप्यवत्तानिर्णयविधयैव वन्हित्वादिना वन्ह्यादिविशिष्टबुद्धिविरोधित्वा
न्वमहानसीयवन्हित्वाद्यवच्छिन्नप्रतियोगिताया अपि वन्हित्वाद्यवच्छिन्नतया महानसीयवन्ह्यभाववत्तानिश्च
कारकज्ञानस्यापि वन्हिमान्नित्याकारकज्ञानविरोधित्वापत्तेरिति वाच्यं । वन्हित्वाद्यवच्छिन्नत्वस्य च वन्हित्वा
५ तिरिक्तधर्मानवच्छिन्नत्वार्थकत्वात् नन्वेवं वन्ह्यभाववत्तादिना घटाभावाद्यवगाहिनो ज्ञानस्य वन्ह्यादिविशि
ष्टबुद्धिप्रत्यविरोधित्वप्रसंगः । तस्य वन्हित्वाद्यवच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वादिति वाच्यं । वन्हि
त्वाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नप्रकारतानिरूपिताऽभावत्वावच्छिन्नप्रकारताया एव प्रतिबं
धकतावच्छेदकत्वात् तादृशप्रकारताशालिज्ञानात्मकबाधबुद्धेर्वास्तवतादृशाभावानवगाहित्वेपि क्षतिवि
रहात् । वन्हित्वाद्यवच्छिन्नतया घटत्वाद्यवच्छिन्नप्रतियोगितायाः संसर्गतयाभानाभ्युपगमे तु तत्संस
र्गाय वन्हित्वविषयतावच्छिन्नत्वावच्छिन्नत्वविषयतावच्छिन्नप्रतियोगित्वविषयतात्वेन तादृशप्रतियो
गित्वविषयताः निवेशनीयाः । न तु वास्तववन्हित्वाद्यवच्छिन्नप्रतियोगिताकत्वेन तथात्वेन । अत एव कंबु
ग्रीवादिमत्त्वाद्यवच्छिन्नप्रतियोगिताया अप्रसिद्धावपि कंबुग्रीवादिमत्त्वादिना घटादिविशिष्टबु
द्धौ कंबुग्रीवादिमान्नास्तीति आकारकबाधबुद्धिप्रतिबंधकतायां नानुपपत्तिः । आलायबुधैर वि

रोधितयाऽनाहार्यत्वनिवेशः। न चाहार्यज्ञानस्याविरोधितया कथमनाहार्यत्वनिवेश इति वाच्यं। यत आहार्य
ज्ञानस्य विशिष्टबुद्धिविरोधित्व आत्मतत्त्वविवेकटिप्पण्यां प्रतियोग्यारोपस्य हेतुताखण्डनेऽनाहार्यारोपस्य
हेतुताखण्डयिताऽहार्यज्ञानस्याविरोधितया तद्धेतुत्वस्यादित्सया शंक्य आहार्यस्याभाववत्ताबुद्धेः प्रागसंभ
वादित्सनेन तद्धेतुत्वखण्डनस्य दीधितिकारस्यासंगततापत्तेः। अथ किं तावदाहार्यत्वं वन्ह्यभावा
दिबुद्धौ न तावद्व्यवहितोत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबंधेन वन्ह्यादिनिर्णयत्वावच्छिन्नव्या व
प्यवत्तानिर्णयकालीनेच्छाधीनवन्ह्यभाववत्ताज्ञानस्याहार्यत्वापत्तेः बाधितादृशसंबंधेन वन्ह्यभाववत्ता
ज्ञानाविरोधिज्ञानपदत्वे इच्छाविरहविशिष्टवन्हिमत्ताज्ञानस्य वन्ह्यभाववत्ताज्ञानविरोधितया इच्छाका
लीनवन्ह्यादिमत्ताज्ञानस्य तथात्वेनाहार्यवन्ह्यभावादिमत्ताज्ञानस्याविरोधिज्ञानत्वाभावात्स्वरूपज्ञानप्रति
बंधकतायामिच्छायाअनुत्तेजकतया इच्छाकालीनज्ञानस्यापि पर्वते वन्ह्यभाववत्ताज्ञानविरोधित्वानानु
पपत्तिरिति चेद्वक्ष्यामि। बाधितदभावव्याप्यवत्ताज्ञाननिष्ठनामवच्छेदकभेदेनाभिज्ञानाविरोधिता
मां अनुगमकरूपाभावेनानुगतरूपेणानिवेशनमशक्यमेव। न च बाधितदभावव्याप्यवत्ताज्ञान
कालीनाहार्य

बा०वा० ६

बाधादिविशिष्टलौकिकज्ञानभिन्नत्वनिवेशे तदिन्द्रियजन्यबाधकालीनलौकिकसंनिकर्षजन्यज्ञानस्यापि प्रतिबंधकत्वापत्तिः। ४
ज्ञानसाधारणानुगतग्राह्यत्वस्य दुर्वचत्वेऽप्यप्रामाण्यज्ञानानास्कंदितवह्निमत्ताज्ञाननिर्णयविशिष्टत्वग्रा
ह्यावह्निव्याप्यादिप्रकारकनिर्णयविशिष्टत्वाद्यवच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्य प्रतिबंधक
तावच्छेदकत्वसंभवान्नायं दोष इति वाच्यं। एवमप्यनुमानिकादिबाधतदभावव्याप्यवत्ताज्ञानकाली
नलौकिकसंनिकर्षजन्यज्ञानस्याविरोधित्वापत्तेः तस्य लौकिकज्ञानाभिन्नत्वात्। तादृश[illegible]र्षजन्य
बाधविशिष्टतदिन्द्रियजन्यज्ञानभेदस्यापि सत्त्वेन निवेशान्नेयमनुपपत्तिरिति चेत्। एवमप्या
हार्यवह्न्यादिनिर्णयकालीनवह्न्यभाववत्ताज्ञानस्याविरोधित्वप्रसंगो दुर्वार एव। न चाहा नी
र्यवह्निमत्तानिर्णयविशिष्टधर्म्यन्तरनिवेशान्न दोष इति वाच्यं। वह्निमत्ताज्ञाननिर्णये निश्चयानाहा
र्यत्वस्यानाहार्यवह्न्यभावनिर्णयविशिष्टान्य[illegible]त्वरूपत्वेनान्योन्याश्रयस्य दुर्वारत्वात्। तन्मते तादृशा
नाहार्यत्वस्य वनिवेशानौचित्यात्। तस्य च वह्न्यभाववत्ताज्ञानाघटितत्वेनान्योन्याश्र याना ६
यप्रसंगात्। यत्तु आहार्यज्ञाने इच्छायाः हेतुत्वोपगमाज्जन्यतासंबंधेनेच्छावत्त्वमेवाहार्य
त्वमिति। तदसत्। इच्छाविषयाहार्यविशिष्टानुमितिसामग्र्यादिनापि भिन्नविषयकप्रत्यक्षादिकं प्रतिबन्ध श्रीराम

तिबंधकत्वापेक्षयातादृशसामग्रीकालीनप्रत्यक्षादौ इच्छाहेतुत्वस्यैव लाघवेन स्वीकारात् । भिन्नविषयकानुमितिसामग्र्या
दिकालीनेच्छाधीनवन्ह्यादिप्रत्यक्षस्यापीच्छाजन्यतयाऽऽहार्यत्वप्रसंगात् । एवं इच्छाजन्यतावच्छेदकं यदि इच्छावि
शिष्टवन्ह्यभावादिप्रकारकप्रत्यक्षत्वं तदा बाधस्यान्यकालीनेच्छाविशिष्टज्ञानस्यापि तदाक्रान्तत्वेनेच्छाजन्यतया
तस्याप्याहार्यत्वप्रसंगः । एवं बाधविशिष्टस्य तज्जन्यतावच्छेदककोटिप्रवेशेऽपि आहार्यवन्हिमत्तानिर्णयका
लीनेच्छाविशिष्टज्ञानस्य तत्पूर्वापरीभूतस्यानाहार्यत्वं वन्हिमत्तानिर्णयविशिष्टज्ञानत्वं वन्ह्यभावप्रत्यक्ष
इच्छाजन्यतावच्छेदकं वाच्यं । वन्हिमत्ताज्ञाननिष्ठानाहार्यत्वमपि जन्यतासंबंधेनेच्छाविशिष्टभिन्नत्वरूपमे
वेत्यवश्यं तादृशज्ञानगोचरेच्छायामपि कार्यतावच्छेदकमनाहार्यवन्ह्यभाववन्निर्णयविशिष्टवन्ह्यादि
प्रत्यक्षत्वं वाच्यं । अन्यथोक्तरीत्यानुपपत्तितादवस्थ्यात् । एवं च वन्हिमत्ताज्ञाननिष्ठानाहार्यत्वज्ञाने तद्घ
टितधर्मावच्छेदेन वन्ह्यभाववत्ताज्ञानेच्छाजन्यत्वग्रहः । न दुर्लभं चेत् । तर्हि वन्ह्यभाववत्ताज्ञानेऽपि अनाहार्यत्वग्रहः
न दूरे चेत् घटितधर्मावच्छेदेन वन्हिमत्ताज्ञानेच्छाजन्यत्वग्रहदुरुत्तरत्वं अपि दुर्ज्ञेयतादोषपरिहारे । यत्तु आ
हार्यवन्ह्यभाववत्ताज्ञानादौ वन्ह्यादेरपि मानबाधकाभावात् सर्वत्र संशयात्मकमेवाहार्यज्ञानं । एवं च नि
श्चयत्वानिवेशेनैवाहार्यज्ञानवारणसंभवादनाहार्यत्वानिवेश एव नास्तीति तन्न निर्वचनेनेति । तद

बाध० वा०

७

प्यसत्। यत्राभिन्नेन्द्रियादिजन्यापेक्षाबुध्यात्मकवन्ह्यभाववत्तानिर्णयः तद्वितीयक्षणे वन्हिमत्तानिर्णयो लौ
किकसन्निकर्षजन्यस्तदनंतरं वन्ह्यभाववत्तानिर्णयापत्तावितो इच्छायास्तदनंतरं चाहार्यवन्ह्यभावप्रत्यक्षानंतरं चाहा
र्यवन्ह्यभाववत्तानिर्णयस्य प्रतिबंधकत्वेन वन्हिमानासंभवात्। निर्णयात्मकस्याहार्यज्ञानस्य संभ
वेनानाहार्यत्वनिवेशस्यावश्यकत्वात्। न चैतन्नाहार्यवन्ह्यभाववत्ताज्ञानमपि न व्यर्थ एवेति वाच्यं। इ
च्छारूपोत्तेजकसत्वे तदुत्पत्तौ बाधकाभावात्। न च बाधप्रतिबंधकतायामपीच्छा वा उत्तेजकत्वं न स्वीक्रि
यते। किंतु इच्छाजन्यभिन्नत्वमेव प्रतिबध्यतावच्छेदककोटौ निवेश्यते। इच्छायाश्च जन्यतावच्छेदकाभिच्छा
विशिष्टसंशयत्वाभिव्यक्त एककोटिकज्ञानस्य बाधप्रतिबध्यतावच्छेदकाक्रांततया न तदा एकको
टिकज्ञानमुत्पद्यत इति वाच्यं। जन्यतायामिच्छाप्रयोज्यत्वादिरूपावच्छेदकभेदाभिन्नत्वेनेच्छाजन्य
त्वावच्छिन्नप्रतियोगिताकभेदनिवेशासंभवेन भेदकूटस्यैव निवेशनीयतया विनिगमनावि
रहेण कार्यकारणभाववाहुल्यात्। इच्छाया उत्तेजकत्वकल्पनस्यैवान्यत्र व्यवस्थापितत्वात् प्रदर्शि
तस्थले अनुभवसिद्धस्याहार्यज्ञानस्याप्यपलापासंभवाच्चेति। तस्मादाहार्यत्वस्य दुर्वचत्वात्

तयाकथमनाहार्यत्वेन प्रतिबंधकमिति। मैवं। अनुगताहार्यत्वस्य दुर्वचत्वेपि अनाहार्यज्ञानानां तत्तद्व्यक्ति
त्वेन कूटस्य प्रतिबंधकतावच्छेदककुक्षौ निवेशनीयत्वात्। केचित्तु। आहार्यज्ञाने यावदप्रामाण्यज्ञानं तत्कूट
घटितावच्छेदकत्वं वा विशिष्टबुद्धेरनाहार्यत्वे निवेश एवं नास्तीत्याहुः। अप्रामाण्यज्ञानास्कंदितज्ञान
स्याविरोधितयाऽप्रामाण्यज्ञानानास्कंदितत्वनिवेशः। तत्र सामानाधिकरण्यविशेष्यत्वोभयवच्छिन्नप्रति संबंधा
योगिताकाप्रामाण्यग्रहाभाववत्त्व। आद्यविज्ञानादिविशेष्यकाप्रामाण्यज्ञानकालीनज्ञानस्य प्रतिबंधकतो
पपत्तये विशेष्यतानिवेशः। विशेष्यताच्याप्रामाण्यप्रकारतानिरूपिता ग्राह्या। पुरुषांतरीयस्याप्रामाण्यग्र
हविषयीभूतस्य ज्ञानस्याविरोधित्वोपपत्तये सामानाधिकरण्यनिवेशः। न चाप्रामाण्यज्ञानाभावस्य प्र
तिबंधकतावच्छेदककोटौ निवेशे आहार्यज्ञानभेदकूटैः सह विशेष्यविशेषणभावविनिगमनाविरहाद
प्रामाण्यग्रहानुमरस्तस्य प्रतिबध्यतावच्छेदककोटौ निवेशनमेवोचितमिति वाच्यं। तथा सत्यप्रामाण्य
ग्रहविशिष्टस्याप्रामाण्यग्रहानास्कंदितबाधबुद्धिद्वयाया आपत्तिवारणाय तत्राप्रामाण्यग्रहहेतुताक
ल्पनप्रसंगात् अप्रामाण्यज्ञानास्कंदितबाधबुद्धिद्वितीयक्षणे तदनास्कंदितबाधबुद्धौ सत्यां तदनंतरम

बा०वा०

८

माप्र

प्रामाण्यग्रहरूपकारणसत्वात्तद्विशिष्टबुध्यापत्तेश्च। तस्मादुत्तेजकमावश्यकमेव प्रामाण्यग्रहवद्व्याप्यवत्ति
स्वग्रहस्याप्युत्तेजकत्वं स्वीकरणीयं। अतः समुच्चयानंतरं न समुच्चये व्यभिचारः। न च संशयवारणाय वन्ह्याद्य
प्रकारकत्वरूपनिर्णयत्वस्य प्रतिबंधकतावच्छेदककोटावप्रवेशेऽपि निवेशनाप्युक्तसमु[illegible]त्मकबाधबुद्धेः उया
वन्ह्याद्यप्रकारकतया तदुत्तरोत्पन्नसमुच्चयात्मकवन्ह्यादिविशिष्टबुद्धौ न व्यभिचार इति वाच्यं। विन
ष्टप्रदवस्थायां तत्संशयानजन्यसमुच्चयानंतरं संशयादिवारणाय समुच्चयसाधारणस्य विरोधिसंसर्गाव
च्छिन्नवन्ह्याद्यप्रकारताशून्यत्वस्यैव प्रतिबंधकतावच्छेदककोटौ निवेशनीयतया समुच्चयोत्तरसमुच्च
ये व्यभिचारस्य दुर्वारत्वात्। केचित्तु। समुच्चयोत्तरसमुच्चये व्यभिचारवारणाय विरोध्यविषयताबाधा
भावजन्यतावच्छेदककोटौ निवेशनीया न तु प्रतिबंधकतावच्छेदककोटावव्याप्यत्वादिति तत्सज्ञानाऽवृत्तिगौ
रवात्। न चैवं संशयात्मकविशिष्टबुद्धौ च प्रतिबध्यत्वमुपपद्येत न तु निश्चये तस्य विरोध्यविषयत्वा क२
दिति वाच्यं। निर्णयात्मकज्ञाने वन्ह्यभाववद्वृत्तिसंयोगादीनामिव संसर्ग[illegible]तया भानाभ्युपगमेन
तस्यापि विरोध्यविषयत्वात्। न च प्रत्यक्षात्मकनिर्णयस्य विरोधिसंसर्गकत्वसंभवेऽपि शुद्धसंयोगादि

क१

घटितव्यापकत्वावगाहिपरामर्शजन्यानुमितौ विरोधावच्छिन्नसंयोगादिसंसर्गकत्वासंभवेन बाधका
लेतद्वापत्तिरिति वाच्यं। तादृशानुमित्यादावपि बाधाभावादेर्बलाद्विरोधमानेन बाधकाभावात्। न
च विरोधावच्छिन्नसंयोगादिसंसर्गकानुमितौ तेन संबंधेन व्यापकत्वावगाहिपरामर्शस्य हेतुतया
तदभावाद्विरोधमाने बाधकाभाव इति वाच्यं। तथाविधपरामर्शजन्यतावच्छेदककोटौ अन्यलिंगका व
नुमितौ व्यभिचारवारणाय तथाविधपरामर्शाव्यवहितोत्तरत्वस्यावश्यं निवेशनीयतया तदनुत्तरा
नुमितौ विरोधभाने तादृशाभावस्याकिंचित्करत्वात्। नन्वेवं शुद्धसंयोगादिसंसर्गघटितव्यापकत्वाव
गाहिपरामर्शजन्यानुमितौ बाधे भावादेर्बलात्संयोगेन तादात्म्यादेरपि संसर्गतया भानप्रसंग इ
प ति वाच्यं। तेन संबंधेन व्यापकताज्ञानभिन्नकालीनतत्संसर्गकानुमितेरनुदयेन तादृशसंसर्गघटित
व्यापकत्वावगाहिपरामर्शमात्रस्यैव बाधाभावादिना संयोगेन तादात्म्यसंसर्गानुमितिजनने
विरोधसामर्थ्याभ्युपगमेन तादृशपरामर्शभिन्नकालीन तदापत्त्यसंभवात्। अत्र तु शुद्धसंयोगादिघ
टितव्यापकत्वावगाहिपरामर्शादपि विरोधावच्छिन्नसंयोगादिसंसर्गकानुमित्यभ्युपगमेन ता

परामर्शस्यापिबाधाभावविशिष्टतादृशानुमितिजनकत्वेन व्याप्तिविशेषसामग्रीत्वो[redacted]पगमेनानुपपत्त्य नु १
बा० बा० भावात् । निरुक्तसंयोगादिघटितव्यापकत्वावगाहिपरामर्शजन्यानुमितौ विरोधावच्छिन्नसंयोगादी
नां संसर्गत्वे तथाभानाभ्युपगमे ऽव्याप्यवृत्तित्वज्ञानकालीनविरोधासंसर्गकैककोटिकवन्धाघ
१८ नुमित्यनंतरं तद्व्याप्यवृत्तित्वज्ञाननाशे शुद्धसंयोगघटितव्यापकत्वज्ञानात्पुनरनुमित्यापत्ति
संग: शुद्धसंयोगपर्याप्तसांसर्गिकविषयताया एव शुद्धसंयोगसंसर्गकसिद्धिप्रतिबध्यतावच्छेदक
तयाविरोधावच्छिन्नसंयोगसंसर्गकानुमितेस्तत्प्रतिबध्य[redacted]त्वस्वीकारादिति वाच्यं । ताद
शपरामर्शजन्यविरोधावच्छिन्नसंयोगादिसंसर्गकानुमितौ शुद्धसंयोगादिपर्याप्तसांसर्गिकवि
षयताया अस्वीकारे पतादृशानुमितेः शुद्धसंयोगादिसंसर्गकसिद्धिप्रतिबध्यत्वापत्तेः । नचैवं वि
ध धं विषयताया बाधप्रतिबध्यतावच्छेदकत्वे ऽव्याप्यवृत्तित्वज्ञानविरहदशायां विरोधाविषयक
ज्ञाननिवारणाय तत्राव्याप्यवृत्तित्वज्ञानरूपत्वास्वीकरणीयेति गौरवमिति वाच्यं । अव्याप्यवृत्ति ९
त्वज्ञानाभावस्य प्रतिबंधकतावच्छेदककोटिप्रवेशे ऽप्रामाण्यज्ञानादिरिव विशेष्यविशेषणभा

भा०या०१

६ पर्वतो वन्ह्यभाववान्प्रमेयत्वाच्चेति ६

वेविनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावबाहुल्यात् । तदपेक्षपक्षे व्याप्यवृत्तित्वज्ञाने हेतुतायाः
वच्छिन्नत्वादिस्य रुः । तदसत् । अव्याप्यवृत्तित्वेन वन्ह्यादिविषयकनिर्विकल्पसमुच्चयान्यज्ञाने ऽविरोधभाना
भ्युपगमेन यथाविधनिर्विकल्पज्ञानान्मेवक्रमसत्तापत्तेः । नचैतत्कश्चिदभ्युपैतीत्यव्याप्यवृत्तित्वज्ञानस्यो
२ तेजकत्वमावश्यकमेवेति । संशयोत्तरोत्पन्नसंशयेऽनुमित्यादौ व्यभिचारवारणाय निर्णयत्वं प्रति स्य
बंधकतावच्छेदककोटौ निवेशनं । अथ निर्णयत्वं यदि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्ह्यादिप्र
कारताशून्यत्वं तदा प्रमेयत्वादिना वन्ह्यादिप्रकारकज्ञानासंग्रहः । यदि च तादृशवन्हित्वावच्छिन्नप्रकारताशू
न्यत्वं तदा वन्ह्यभावाभावत्वादिना वन्हिकोटिकवन्ह्यभाववान्न चेति संशयस्याविरोधित्वापत्तिरिति पि
चेन्न । अन्यतरत्वावच्छिन्नत्वावच्छिन्नप्रकारत्वाभावस्य वन्ह्यभावाभावत्वावच्छिन्नप्रकारत्वाभावस्य च
निवेशेनानुपपत्त्यभावात् । किंचित्तु प्रमेयत्वादिना वन्ह्यादिप्रकारकज्ञाने वन्ह्यभावाधिकरण
३१ वृत्तित्वविरोधो न संसर्गेण याभासते किंतु वन्हित्वतदभावाभावत्वावच्छिन्नप्रकारकज्ञान ता
एव । इत्थं च तादृशप्रकारत्वेन यथाविधविरोधसंसर्गावच्छिन्नप्रकारतात्वेनानुगमय्य एक एवा

या

भावो निवेशनीयस्तत्राह ॥ अवच्छेदकावच्छेदेन विशिष्टबुद्धिं प्रति बाधनिर्णयस्य प्रतिबंधकता
या०वा यां कीदृशो निर्णयत्वं निवेश्यते । यदि पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यभावप्रकार
त ताशून्यत्वं तदा नील पर्वतो वह्निमान्वा पर्वतो वह्न्यभाववान्वेति ज्ञानासंग्रहः । शुद्धपर्वतत्वा
वच्छिन्नविशेष्यताघटितनिर्णयत्वं निवेशे च नीलपर्वतो वह्निमान्नवेति संशयस्यापि
शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारताशून्यत्वात्प्रतिबंधकत्वप्रसंगादिति चेन्न ।
तादृशप्रकारताशून्यशुद्धपर्वतत्वावच्छिन्नविशेष्यताकवह्न्यभाववत्ताज्ञानस्याविरोधित्वेनानुप
पत्त्यभावात् । नन्वेवं सति नीलपर्वतो वह्न्यभाववानित्येतादृशनिर्णयदशायामपि पर्वतत्वा
वच्छेदेन वह्निमत्ताज्ञानप्रसंग इति वाच्यं । नीलपर्वतत्वावच्छेदेन वह्निविशिष्टबुद्धौ नीलप
र्वतत्वावच्छिन्नविशेष्यताकबाधबुद्धेः प्रतिबंधकत्वेऽप्यन्यथा शुद्धपर्वतत्वावच्छेदेन वह्निवि नीये
शिष्टबुद्धिसामान्यस्य नीलातिरिक्तत्वे सति पर्वतत्वातिरिक्तत्वे सत्यवच्छिन्नविशेष्य य
तानिरूपितावच्छिन्नसंयोगसंसर्गावच्छिन्नवह्निप्रकारताशालिज्ञानत्वस्यप्र

निबध्यतावच्छेदकत्वोपगमात् । तत एव नीलपर्वतो वन्ह्यभाववानित्यादिबाधकाले शुद्धपर्वतत्वावच्छे
देन वन्हिमत्ताज्ञानस्यापि वारणसंभवात् । नन्वेवं नीलपर्वतो वन्ह्यभाववानित्यादिबाधकाले नीलप
र्वतत्वव्यापकतायाः संसर्गतयाऽवच्छेदनीयतया शुद्धपर्वतत्वावच्छेदेन वन्हिमत्ताज्ञानस्य
र्वतत्वव्यापकत्वानवगाहितया कथं तत्संग्रह इति चेन्न । नीलपर्वतवृत्त्यभावप्रतियोगितान
त्व वच्छेदकधर्मवत्त्वरूपनीलपर्वतत्वव्यापकताघटकपदार्थानां नीलत्वान्यपर्वतत्वान्यधर्मावच्छिन्नायाः न
पर्वतविषयतातदवच्छिन्नाया आधेयत्वविषयतेत्येवं क्रमेण निवेशात् । शुद्धपर्वतत्वव्यापकत्वा
वगाहिज्ञानस्यापि वन्हिमत्त्वावच्छेद्यावच्छेदकभावापन्नविषयताशालित्वेन तत्संग्रहसंभवा
त् । एवं पीतपर्वतत्वावच्छेदेन वन्हिविशिष्टबुद्धौ यथासंभवं प्रतिबध्यकत्वं बोध्यं । सामानाधि
करण्यमात्रेण वन्हितदभावोभयकोटिकज्ञानस्याविरोधित्वोपपत्तये अवच्छिन्नसंयोगादि
संसर्गावच्छिन्नवन्हिप्रकारताभिन्नत्वमेव सामानाधिकरण्यावगाहिज्ञानस्य प्रतिबध्यक
तायां निवेश्यं । एवं च पर्वतत्वसामानाधिकरण्यमात्रेण वन्हि पर्वतत्वावच्छेदेन वन्ह्यभाव

बा॰वा॰ वगाह्यमानस्य संशयस्य वारणाय प्रभुद्धविशेषणतासंसर्गकत्वमेव निवेशनीयं । अवच्छेदकावच्छेदेन वृ
न्यभावत्वज्ञाने निरूपितसामानाधिकरण्यावगाहि भवन्निमतो ज्ञाननिष्ठप्रतिबध्यतावच्छेदककोटौ
२२ दैन्वसंसर्गारोपयोः प्रवेश इति निवेशः । तत्प्रतिबध्यतावच्छेदकस्यैवावच्छेदकत्वसामानाधिकरण्यमात्रा
वगाहितदवच्छेदवच्छेदकत्वावगाहिज्ञानसाधारणतया नावच्छेदकावच्छेदेन बाधकाले ऽवच्छेदका
वच्छेदेन वह्निविशिष्टबुद्ध्यापत्तिरित्यवधेयं । अथ बाधबुद्धेर्निर्णयत्वेन प्रतिबन्धकतायां सं
निर्णया शयोत्तरोत्पन्नैवविशेषदर्शनप्रत्यक्षोपपत्तिः । अत्रापाध्यायमतानुयायिनः तत्प्रकारकनिर्ण
यत्वावच्छिन्नप्रतिसंशयसाधारणतदभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वान्तरकल्पनान्न सं
शयानन्तरं निर्णयापत्तिः । अयं पुरुषो न वेति संशयदशायां पुरुषत्वव्याप्यकरादिमत्तानिर्णय क
सत्त्वे ऽयं पुरुष इति निर्णयोत्पत्त्यां विशेषदर्शनस्योत्तेजकत्वं स्वीकरणीयं । तथा च तद्व्याप्यवत्ता
निर्णयाभावविशिष्टतदभावप्रकारकज्ञानत्वेन प्रतिबन्धकतेति पर्यवसितं । संशयोत्तरसंशये व्याप्ति
चारवारणाय प्रतिबध्यतावच्छेदककोटौ निर्णयत्वानिवेशात् । तद्वत्तदभावप्रकारकत्वमित्याहु
स्तन्मतानयोग्यतासंशयकालीनशाब्दबोधादौ व्यभिचारः । अनुमानिकबाधकाले ऽनेव

विशेषदर्शनं लौकिकसन्निकर्षजन्यज्ञानोदयात्तत्र व्यभिचारवारणाय लौकिकान्यत्वमपि निवेशनीयं । तथा च लौकि
कान्यतदभावप्रकारकतत्प्रकारकप्रत्यक्षत्वं प्रतिबध्यतावच्छेदकं । एवं च यदिन्द्रियजन्यसंशये यद्दशायां विना वि
शेषदर्शनं तदिन्द्रियजन्यलौकिकप्रत्यक्षवारणाय तत्प्रकारकचाक्षुषत्वं निर्णयत्वावच्छिन्नप्रतिविशे
षदर्शनाभावविशिष्टतदभावप्रकारकचाक्षुषत्वादिना संशयसाधारणमेव प्रतिबंधकत्वं स्वीकरणीयं
एवं च निर्णयत्वं प्रतिबंधकतावच्छेदककोटौ निवेश्यं तदिन्द्रियस्य लौकिकप्रतिबध्यप्रतिबंधकतातदिन्द्रि
यजन्यबाधविशिष्टतदिन्द्रियजन्यज्ञानभेदस्येत्यादि न कल्प्यते प्रयोजनविरहात् । परं तु बाधनिर्णय
कालसंशयदशायां बाधानुमित्यादिवारणाय लौकिकान्यत्वप्रकारतानालिङ्गितज्ञानत्वावच्छिन्नप्रतितदभा
वप्रकारकनिर्णयत्वेन सामान्यप्रतिबंधकत्वं कल्पनीयं । बाधनिर्णयदशायां विशेषदर्शनसत्त्वे प्रत्य
क्षनिर्णयस्य प्रामाणिकत्वे तु प्रत्यक्षनिर्णयान्यज्ञानत्वमेव बाधनिर्णयप्रतिबध्यतावच्छेदकं वाच्यं सं
शयसाधारणप्रतिबंधकतये च बाधनिर्णयकाले प्रत्यक्षनिर्णयापत्तिवारणसंभवात् । न च विपरी
तज्ञानशून्यदशायां प्रत्यक्षनिर्णये उत्पद्यमाने प्रत्यक्षनिर्णयान्यत्वावच्छिन्नापत्तिर्विपरीतज्ञाना
भावरूपकारणबलादिति वाच्यं । प्रत्यक्षनिर्णयसामग्रीदशायां प्रत्यक्षनिर्णयान्यज्ञानत्वान्तर

शं० वा० स्प

१२

संशयत्वानुमितित्वाद्यवच्छिन्नसामग्रीविरहेण तदवच्छिन्नापत्तेरसंभवात् । अंधकारे स्तंभादौ घटादिसंशये
व्यंजकाविरहदशायां कुंकुमादौ गंधसंदेहे च तस्यालोकादिव्यंजकसमवधाने तन्निर्णयोदयाद्धि विशेषद
र्शनेन तदालोकव्यंजकसमवधानादीनामपि तदिंद्रियस्थलीयप्रतिबंधकतायामुत्तेजकत्वं स्वीकार्यं न
चालोकसमवधानादीनामुत्तेजकत्वे यत्रालोकसमवधानादिसत्त्व एव दूरत्वादिप्रयुक्तः संशयः तत्र विशे
षदर्शनं विनैव निर्णयापत्तिरिति वाच्यं । विपरीतज्ञानदशायां घटालोकसंयोगव्यक्तिसत्त्वे निर्णयस्ते
षामेव तत्तद्व्यक्तित्वेनोत्तेजकत्वोपगमात् । अंधकारप्रयुक्तसंशयानंतरमालोकसमवधानान्निर्ण
यस्तदनंतरं च तादृशनिर्णये प्रामाण्यग्रहाधीनो दूरत्वादिप्रयुक्तो वा संशयस्तदनंतरं निर्णयापत्तिः । एवं
निर्णयानुरोधेन कॢप्तोत्तेजकताकस्यालोकसंयोगस्य सत्त्वादिति वाच्यं । तादृशालोकसंयोगस्य तत्क्षणा
वच्छिन्नस्यैवोत्तेजकत्वोपगमात् । आलोकसंयोगादीनां स्वावच्छेदकावच्छिन्नसंयोग च चक्षुःसंयुक्तमनः
प्रतियोगिक विजातीयसंयोगरूपपरंपरासंबंधावच्छिन्नप्रतियोगिताकाभावो विपरीतज्ञानेसा
मानाधिकरण्यसंबंधेनानिवेशनीयः । अन्यथा विषयालोकसंयोगसमवधानदशायामपि समवाया
दिनात्मदशावस्यात्मनि सत्त्वेन निर्णयानुदयप्रसंगात् । अस्य चात्र तदालोकसमवधानकालीनात्म

मनःसंयोगव्यक्तीनामेवसमवायेनोतेजकत्वमभ्युपेयेतपदार्थांतरसंयोगादिकमादायविनिगमनाविरहस्या
वयोस्तत्कल्पयत्वादित्याहुः।मिश्रास्तु।लौकिकान्यविनिष्ठबुद्धित्वावछिन्नप्रतिविपरीतनिर्णयत्वेनैव
विरोधितासंशयानंतरं।विनाविशेषदर्शनंप्रत्यक्षनिर्णयापत्तिवारणायविपरीतज्ञानोत्तरप्रत्यक्ष
निर्णयत्वावछिन्नंप्रतिविशेषदर्शनस्यहेतुताकल्प्यते।विनैवविशेषदर्शनंविपरीतज्ञानानुतराम
त्यक्षस्ययोग्यतासंदेहनंतरंशाब्दबोधादेःसंशयस्यवापत्यातव्यभिचारवारणायविपरीतज्ञानोत्तरत्वप्रत्य
क्षत्वनिर्णयत्वानाक्रांतावछेदकोटिनिविष्टज्ञानभिन्नेंद्रियजन्यसंशयकालेविनैवविशेषदर्शनं
लौकिकनिर्णयासत्त्वात्लौकिकान्यत्वमपिनिवेशनीयं।दत्यंचतादृशेंद्रियजन्यसंशयकालेविनाविशेष
दर्शनंलौकिकनिर्णयवारणायचग्राह्यविपरीतज्ञानोत्तरग्राह्यत्वाधवछिन्नप्रतिविशेषदर्शनस्य
हेतुत्वांतराणिकल्पनीयानि। [redacted] सतिचविशेषदर्शनेतादृशेंद्रियजन्यबाधनिर्णयेपितादृशेंद्रियजन्यस्यप्रसंगात्।एवंत च
दिंद्रियस्थलीयप्रतिबध्यप्रतिबंधकभावोपिनकल्प्यते।तदिंद्रियजन्यबाधकालेकारणाविरहेण।

चलौकिकप्रत्यक्षापत्त्यसंभवादित्याहुः। अत्रेदं चिन्त्यामीरयामः। संशयादिसाधारणलौकिकप्रत्यक्षविशे
बा॰वा॰ ष्यबुद्धित्वावच्छिन्नप्रतिविपरीतनिर्णयत्वेनप्रतिबंधकताउभयमतेऽपितुल्यैव। किंतुप्रत्यक्षनिर्ण
यस्यत्वेनधुनरविशेषदर्शनत्वेनहेतुतामिश्रमते उपाध्यायमतेतुविशेषदर्शनाभावविशि
१३ ष्टविपरीतज्ञानाभावस्वरूपगुरुधर्मेणेति विशेषः। नन्वेवंमतेऽपिकार्यतावच्छेदकगौरवम
स्यापिविपरीतज्ञानाभावघटितान्तरवघटितनधुनरविशेषदर्शनजन्यतावच्छेदकापेक्षयालौकि
कान्यप्रत्यक्षत्वपूर्वनिर्णयत्वतादृशविपरीतज्ञानाभावजन्यतावच्छेदकस्यलघुत्वरशरीरतया
नोपाध्यायमतेगौरवावकाशइतिवाच्यं। विशेषदर्शनस्यो[illegible]प्रामाण्यग्रहाभावादिरूपैःवि
शेषदर्शनाभावस्यविशेष्यविशेषणभावेविनिगमनाविरहेणकार्यकारणभावप्रयुक्तगौरवस्य
प्रसंगोऽपिदुर्वारत्वात्। नचाप्रामाण्यज्ञानास्कंदितविपरीतज्ञानदशायांविनैवविशेषदर्शनं
प्रत्यक्षनिर्णयोदयेनाप्रामाण्यज्ञानाभावविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षस्यैवविशेषदर्शनज
न्यतावच्छेदकंमिश्रमतेवाच्यं। अस्त्वेवाप्रामाण्यज्ञानाभावविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षमाति
विशेषदर्शनतत्तविशेषादर्शनाभावविशिष्टविपरीतज्ञानोत्तरप्रत्यक्षत्वमप्रामाण्यज्ञानत्वे

नवा हेतुत्वे तत्राविनिगमनाविरह इति वाच्यं । अप्रामाण्यग्रहस्य हेतुत्वे भाविज्ञानादिविषयकाप्रामाण्यग्र
तद हकालीननिर्विषयबाधबुद्धिदशायां विनैव विशेषदर्शनं तादृशाप्रामाण्यग्रहबलान्निर्णयापत्तेरेवावि
निगमकत्वात् । अथ विशेषदर्शनं विनापि विपरीतज्ञानदशायामिच्छाबलादाहार्यनिर्णयोत्पत्त्या
व्यभिचारवारणाय इच्छाविरहविशिष्टविपरीतज्ञानेतरप्रत्यक्षनिर्णयत्वावच्छिन्नं प्रति विशेषदर्श
नत्वेन हेतुता वाच्या । तथा विशेषदर्शनाभावविशिष्टविपरीतज्ञानेतरप्रत्यक्षं प्रतीच्छात्वेन हेतुता
माश्रयविनिगमनाविरह इति चेत् । अस्त्वेतादृशाविनिगमनाविरह इच्छायामपि हेतुत्वाए
२६ वमपि इच्छाभावविशेषदर्शनाभावाप्रामाण्यग्रहाभावानां परस्परविशेष्यविशेषणभावे विनिग
मनाविरहस्य यावन्तः कार्यकारणभावास्तदपेक्षया कार्यकारणभावलाघवस्यानपायात् । ननु
तादृशाभावकूटविशिष्टविपरीतज्ञानाभावस्य तद्व्यक्तित्वेनैव हेतुत्वोपगमान्न विनिगमना
विरहेण कार्यकारणभावबाहुल्यसंभावनापीति वाच्यं । अभावस्य तद्व्यक्तित्वेन हेतुतायाः
सिद्धान्तविरुद्धत्वात् । तथात्वे तादृशविपरीतज्ञानध्वंसान्यतरत्वावच्छिन्नाभावानामपि तत्त्व

क्तित्वेन हेतुतामादाय विरुद्धनिगमनाविरहप्रसंगाच्च । यत्तु । मिश्रमते विपरीतनिर्णयत्वेन प्रतिबंधक
तायां विशेषदर्शनस्योत्तेजकत्वमावश्यकं । अन्यथा विपरीतनिर्णयकालेपि विशेषदर्शनसत्वेपि
प्रतिबंधकसत्वेन प्रत्यक्षनिर्णयानुदयापत्तेः । न च तत्र विपरीतनिर्णयोत्पन्न इष्ट एव प्रत्यक्षानु
१४ त्पत्तेन तु तद्व्यवहितक्षण इति वाच्यं । तथा सति मिश्रमते प्रत्यक्षे विशेषदर्शनं हेतुतायाः
सिद्धौ तत्कारणस्य समसंशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनहेतुतामते स्यादिप्रथमकथनासं स्था
संगत्यापत्तेः । तस्मादुपाध्यायमतापेक्षया किं लाघवमिति । तदसत् । प्रत्यक्षनिर्णयान्यज्ञानत्व
स्यैव विपरीतनिर्णयप्रतिबध्यतावच्छेदकत्वोपगमात् विपरीतनिर्णयदशायां सति विशेषदर्शने
प्रत्यक्षोत्पत्तौ बाधकाभावात् । एवं उपाध्यायमते प्राथमिकसंशयोत्पत्तिकाले प्रत्यक्षनिर्णय
स्याव्युच्छिन्नापत्तिः । विशेषदर्शनाभावविशिष्टविपरीतज्ञानाभावस्य प्राक्सत्वात् तत्तद्धारणा
पुनर्निर्णयत्वावच्छिन्नं प्रति संशयसामग्र्याः प्रतिबंधकत्वं कल्पनीयमिति गौरवं । मिश्रम
मते विशेषदर्शनजन्यतायामेव निर्णयत्वस्य निवेशात् विशेषदर्शनेतरकारणबलात् तत

दवच्छिन्नस्याप्रतिः संभवति विशेषदर्शनदशायां तु संशयानुदयेन तदवच्छिन्नोत्पत्तिरिष्टैव । नन्वेवोपाध्याय
मतेप्येतादृशविपरीतज्ञानाभावस्य कार्यकालवृत्तित्वेन हेतुत्वोपगमात्संशयोत्पत्तिकाले तदभावान्न त
तो [redacted] निर्णयत्वावच्छिन्नापत्तिरिति वाच्यं । एवमप्यप्रामाण्यज्ञानास्कंदितसंशयोत्पत्तिकाले प्रामाण्यग्र
हाभावविशिष्टविपरीतज्ञानाभावरूपकारणसत्वेन निर्णयत्वावच्छिन्नापत्तेर्दुर्वारत्वात् । न च संशयोत्त
रसंशये व्यभिचारवारणाय तदभावमात्रस्य सामग्र्याः एव विशेषदर्शनवदुत्तेजकत्वमुपेयते न तु निर्ण
यत्वस्य जनकतावच्छेदकत्वमिति न निर्णयत्वावच्छिन्नापत्तिरिति वाच्यं । तथात्वे त्वेतादृशगौरवस्यापि
च स्यात् । अथ पुरुषत्वव्याप्यकरवान्न तथाविधैरणव्याप्तित्यादिना नानाविधविशेषदर्शनानामनुगत
रूपेणैव हेतुता न संभवति व्याप्तेः स्वावच्छेदकादिभेदेन भिन्नतया पुरुषत्वव्याप्यवत्ताज्ञानस्याननु
गतत्वादिति विशिष्यैव हेतुता वाच्या । तथा च परस्परजन्यप्रत्यक्षे परस्परं व्यभिचारेपो कथं हे
तुता । नन्वपुरुषत्वाभाववत्ताज्ञानविरोधित्वेन तथाविधसकलदर्शनानामनुगमः संभवतीति
त वाच्यं । विरोधितायाः विरोधितावच्छेदकघटितैः यावत्पुरुषत्वाभाववत्ताज्ञानत्वादिकं एव विरोधितावच्छेदक
भेदेन भिन्नत्वात्तदनुगमत्वादवस्थान्यात् । एवं विनापि विशेषदर्शनं अंधकारे घटादिसंदेहे आ

न१

लोकसंभवधूमाद्यर्थेनानिर्णयोत्पत्त्याव्यभिचारः।विपरीतज्ञानविरोधितायास्तस्या धारण्येपि
विशेषदर्शनालोकसंयोगादिसाधारणप्रतिबंधकतावच्छेदकसंबंधस्यैकस्य दुर्वचत्वात्।ननु
विशेषदर्शनविरहप्रयुक्तविपरीतज्ञानोत्तरप्रत्यक्षत्व।विशेषदर्शनजन्यतावच्छेदकपदार्थे
तस्यत्वेनालोकादिसंयोगविरहप्रयुक्तमेवाविपरीतज्ञानं नतु विशेषदर्शनविरहप्रयुक्तमि
त्यनेनव्यभिचारसत्वेवाच्यं।विशेषदर्शनविरहप्रयुक्तत्वस्य दुर्वचत्वादितिचेन्न।विशेषदर्श
नजन्यतावच्छेदककोटौ अव्यवहिततत्तत्संबंधेन विशेषदर्शनवाद्वैशिष्ट्यस्य निवेशनीय
तयाकुत्रापिव्यभिचाराभावात्।इत्थंचविपरीतज्ञानवैशिष्ट्यमपिनानिवेश्यते।प्रयोज
नाभावात्।एतेनाविपरीतज्ञानमन्यकाले विशेषदर्शनरूपकारणबलात् विपरीतज्ञा
नोत्तरप्रत्यक्षत्वावच्छिन्नापत्तिस्तद्वारणायाभिन्नमते विपरीतज्ञानोत्तरप्रत्यक्षत्वावच्छि
न्नंप्रतिविपरीतज्ञानत्वेनहेतुतावाच्या।एवमानुमानिकादिविपरीतज्ञानकाले विशे
षदर्शनबलाच्चाक्षुषविपरीतज्ञानोत्तरचाक्षुषनिर्णयत्वावच्छिन्नापत्तिवारणायतत

अ[illegible]चाक्षुषविपरीतज्ञानसामग्र्यादिना हेतुत्वांतरं कल्पनीयमिति विपरीतज्ञानस्य सकलकार्यकारणभावा
नामाधिक्यमिति गौरवमुक्तं। विपरीतज्ञानोत्तरत्वस्य कार्यतानवच्छेदकत्वेन तदवच्छिन्नापत्त्यभा ६कु२
वात्। एवं विशेषदर्शनस्यापनीतज्ञानसामान्यचाक्षुषस्यादर्शनादिभेदेन कार्यताबाहुल्यमपि
नास्तीत्युक्तिकान्यस्तु कार्यतावच्छेदककोटौ निवेश्यतां लौकिकालौकिकसाधारणविशेषदर्शन
विशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनस्यैव हेतुताया उपपत्तेः। अथ विपरीतज्ञानोत्तरप्रत्य
क्षत्वावच्छिन्नं प्रति विशेषदर्शनाविशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति चाविशेषदर्शनत्वेन हेतुत्वकल्प
ने विपरीतज्ञानकाले विनाविशेषदर्शनं प्रत्यक्षानुपपत्तिः। सामान्यसामग्रीबलादस्यैव। न च सामा
न्यसामग्र्याः विशेषदर्शनलक्षणविशेषसामग्र्यां निर्णयाः संभवन्तीतायाः एव फलजनकत्वेन तां
विना कथमापत्तिरिति वाच्यं। विशेषदर्शनं विनापि सामान्यसामग्र्याः विपरीतज्ञानानुत्तरप्र
त्यक्षोत्पादेन विशेषदर्शनाघटितसामान्यसामग्र्या एव फलव्याप्यत्वस्वीकरणीयतया तादृश
सामग्र्याः विपरीतज्ञानकालेऽपि सत्त्वेनापत्तिसंभवादिति चेन्न। विपरीतज्ञानानुत्तरप्रत्यक्षं प्र
ति विपरीतज्ञानाभावस्यापि हेतुत्वोपगमात्। विशेषदर्शनविपरीतज्ञानाभावान्यतरविशेष

सामग्र्यास्तत्सत्तायाएवसामान्यसामग्र्याः फलोपधायकत्वोपगमेनविपरीतज्ञानकालेऽविशेषदर्शना
बा०प्र०बा० सत्वेतदन्यतराभावेनापादनासंभवात् । नन्वेवमप्यानुमानिकविशेषदर्शनोत्तरलौकिकचाक्षु तज्ञा २
१६ षादेर्विपरीतज्ञानोत्तरत्वेनविपरीतज्ञानाभावजन्यतावच्छेदकानाक्रान्तत्वेन विशेषदर्शनानुत्त
रत्वेनचविशेषदर्शनेऽजन्यतावच्छेदकानाक्रान्ततया चाक्षुषादेर्विपरीतज्ञानकालविनैवविशे
षदर्शनापत्तिरिति वाच्यं । चाक्षुषविपरीतज्ञानानुत्तरचाक्षुषत्वावच्छिन्नं प्रतिचाक्षुषविपरी
तज्ञानाभावस्यानिहेतुत्वोपगमात्तादृशफलस्यचाक्षुषविपरीतज्ञानाभावजन्यतावच्छेदका
क्रान्ततया दृशकारणविरहेण चाक्षुषादेर्विपरीतज्ञानकालेतदापत्त्यसंभवात् । नन्वेवं विपरी
तज्ञानाभावस्यसत्सकार्यकारणभावानां मिश्रमतेप्यावश्यकतयालाघवानवकाश इति वा
-च्यं । उपाध्यायमते तादृशासत्सकार्यकारणभावे विशेषदर्शनाभावकूटनिवेशेनतेषां परस्परं
अप्रामाण्यग्रहाभावादिभिः स्वसंविशेषणविशेष्यभावेविनिगमनाविरहेणानन्त्यात्
मिश्रमतेचैकैकविधविशेषदर्शनस्यैकैकहेतुतायाएवकल्पनेलाघवस्यानपाययात् । एतेन

कार्यतावच्छेदककोटौ विपरीतज्ञानानुत्तरत्वनिवेशाप्रयुक्तगौरवमप्यधिकं चित्करमेव । नन्वाव्यवहि
तोत्तरत्वस्यानुगतस्य दुर्वचतया तत्तद्व्यक्तिविश्रान्तेरिति वाच्यं । अनुगतत्वनिर्वचनवर्त्मनो द
र्शितत्वादिति । अत्र वदन्ति । विपरीतज्ञानोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वेनाधिकं किंतु पु
रुषत्वाद्यनुमितौ पुरुषत्वादिव्याप्यवत्तानिर्णयहेतुतया आवश्यकत्वात् तेनैव तादृशानिर्णयवि
शिष्टत्वनिवेशस्यावश्यकतया प्रयोजनाभावेनानुमितित्वानिवेशात् तादृशकार्यकारणभावेनै
वोपपत्तेः । न च तत्रानुमितित्वनिवेश आवश्यकः अन्यथा सिद्ध्यादिकालेऽपि तादृशपरामर्शाज्ज
धु न्यतावच्छेदकाक्रान्तप्रत्यक्षोत्पत्त्यासिद्ध्यभावासहकृतस्यापि तस्य फलव्याप्यतायाः स्वी
करणीयत्वात् सिद्धिकालेऽनुमित्यापत्तिरिति वाच्यं । अनुमितित्वस्य जन्यतानवच्छेदकत्वे
न तद्धर्मेणानुमितित्वावच्छिन्नापादनासंभवात् । तादृशपरामर्शो विशिष्टावच्छिन्नस्य
प्रत्यक्षादेरेवोत्पत्त्या तत्रैवापत्तिरिति । तच्चिन्त्यं । पुरुषत्वव्याप्यकरादिमांश्चायमित्याद्या तादिक
कारकज्ञानद्वयादपि विपरीतज्ञानोत्तरानिर्णयोत्पत्त्या करत्वाद्यवच्छिन्नविशेष्यकपु

सि पत्वादिव्याज्ञानविशिष्टकराद्दिमत्तात्ज्ञानत्वेन विशेषदर्शनस्य विशिष्टपरामर्शहेतुता विलक्ष
बा०वा० णहेतुतायाः आवश्यकत्वात् न च तादृशज्ञानद्वयाद्येककाले विपरीतज्ञानदशायां प्रत्यक्षं न जाय
१७ त एवेति वाच्यं तादृशज्ञानादेरपि भ्रमादिविरोधित्वे यत्तत्तत्वप्रत्यक्षनिर्णयासाहस्य भ्रमविरोधित्वेन
विशेषदर्शन हेतुता लिखितादौ धितिकारादेः संमतत्वात् न चैवं नालक प्रत्यक्षनिर्णये विशेषदर्शनाभा
व विशिष्टविपरीतज्ञानाभावस्य विशेषदर्शनस्य हेतुत्वे मानाभाव इति न च तद्दकल्पने संशयोत क्ष
रं विनैव विशेषदर्शनं निर्णयापत्तिः संभवतीति निर्णयत्वस्य पुरुषत्वाभावाद्यप्रकारकपुरुषसप्र
व कारकज्ञानत्वादिरूपस्य नीलतरघटत्वादिवैशिष्ट्यसमाजेय तया कस्यचिज्ज्ञानत्वावच्छेदकत
यात् दवच्छिन्नस्यापादकाभावात् पुरुषत्वादिप्रकारक सत्वावच्छिन्नं तु संशयात्मकमेव ज्ञा स्त
यते तदभावस्याप्युपस्थितत्वात् ज्ञानेबाधकाभावात् न च संशयोत्तरं विशेषदर्शनात्सति
समयेतत्सकारकनिर्णयार्थं वश्यादेवोत्पद्यतां तदभाववत्ताज्ञानेतु व्याप्यवत्ता ज्ञानस्य कार्य
कालवृत्तितया प्रतिबंधकत्वात् तदानीं तदभाववत्ता न संभवादिति वाच्यं तादृशस्थलेदृष्ट १७
त्वात् तादृशविशेषदर्शनेनिर्णयोत्पादस्य

सर्वमतसिद्धः । योग्यतानिश्चयक्षणे तत्स्वीकारे क्षतिविरहात् । न च भ्रमोत्तरं विशेषदर्शने प्रत्यक्षनिर्ण
योत्पादात्प्रत्यक्षनिर्णयान्यज्ञानत्वं अवश्यं बाधप्रतिबध्यतावच्छेदकं वाच्यं । तथा च बाधनि
र्णयकाले विना विशेषदर्शनं प्रत्यक्षनिर्णयवारणाय विशेषदर्शनादिहेतुसमाजवत्त्वमपि
ति वाच्यं । भ्रमकाले विशेषदर्शने सत्यपि भ्रमनाशानंतरमेव निर्णयोपगमात् । प्रत्यक्षनिर्णयान्यत्वस्य बाधनिर्ण
यप्रतिबध्यतावच्छेदककोटावनिवेशादित्याहुः । अत्र ब्रूमः प्रत्यक्षनिर्णयान्यत्वस्य विपरीतज्ञानोत्तरप्रत्यक्षप्र
ति विशेषदर्शनस्य हेतुत्वेनायं पुरुषः इत्याकारकसंशयद्वयसामग्र्या अयं पुरुषः इत्यादिमानसं प्रति प्रतिबंधक
ज्ञानकल्पनं मिलितयोर्यतो द्वयोर्व्याप्यसामग्र्योर्द्वयोर्यादृशावच्छिन्नविशेष्यकपुरुषत्वाभावप्रकारकयोग्यता
ज्ञानसत्तायां अवश्यकत्वे तद्धेतुतरविशेषदर्शनस्य पक्षे पि विरहे एव अयं पुरुषः इत्यादिमानसवारणासंभ
वात् । पुरुषत्वादिव्याप्यवत्ताज्ञानकाले तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वेन तद्व्यसामग्र्या ए
वाभावात् । अयं पुरुष इत्यादिमानसस्य [illegible]प्रसक्तात् । विशेषदर्शनाहेतुमते संशयात्मकयोग्यताज्ञान त्व
घटितताद्दशसामग्र्यीकाले ताद्दशमानसवारणाय तथाविधसामग्र्याः प्रतिबंधकत्वकल्पनमा

१७०७० स्यु

वश्यकमितिगौरवं । न च निर्णयं प्रत्येव विशेषदर्शनं हेतुरनया तादृशसिद्धसामग्रीकाले मानससंशयवारणाय तादृश

सामग्र्याः प्रतिबंधकत्वमवश्यतांप्यावश्यकमेवेति वाच्यं । पुरुषत्वाद्युपस्थितिविषयकमानसं प्रति तादृशपक्षताद्य

सामग्रीरूपप्रतिबंधकताया उभयमतसिद्धतया तद्ध्यानासंभवेन संशयापत्त्यसंभवात् । पुरुषत्वाभाववा

नसेच्छासत्वे च तादृशेच्छाविशिष्टमानससामग्रीरूपप्रतिबंधकाभावघटितत्वाद्धसामग्र्या असत्वेन संश

यस्यैष्टत्वात् । न च विशेष्यतावच्छेदकसामानाधिकरण्यमात्रावगाहिविपरीतज्ञानोत्तरतादृशप्रत्यक्षे विशे

षदर्शनस्याहेतुतया तथाविधयोग्यताज्ञानघटितसिद्धसाध्यकाले तथाविधमानसवारणायतत्सिद्धसा

मग्र्याः प्रतिबंधकत्वकल्पनमावश्यकमेवेति वाच्यं । तादृशयोग्यताज्ञानघटितसामानाधिकरण्यमात्रा

५ कल्पनेऽपि तादृशमानसंप्रति ५

वगाहिमानससंप्रति विरोधित्वे वच्छेदकावच्छेदेन योग्यताज्ञानघटितावच्छेदकावगाहित्वाद्धसाम

ग्र्या विरोधित्वकल्पनेन लाघवसंभवात् । न च मन्मते पि तादृशसिद्धसामग्र्याः प्रतिबंधकत्वं नास्ति किंतु

तथाविधबाधनिर्णयाभावस्य कार्यसहभावेन विशिष्टबुद्धिं प्रति हेतुतया कार्यकाले तादृशसिद्ध

बोधोत्पत्त्या बाधनिर्णयाभावविरहेणैव तथाविधमानससंवारणसंभवादिति वाच्यं । पक्षतादृश

सिद्धसामग्रीकाले भाविशिष्टज्ञानमप्रत्यप्रामाण्यग्रहशालीतरतादृशसिद्धबोधोत्पत्तिस्तथा प्रा

[illegible] त्राव सा

त्वं

माण्यग्रहाभावविशिष्टबाधनिर्णयाभावरूपकारणमतेन ताद्दशमानसाभिसंभवात् । अथापास्वेताद्दशं
लाघवं तथापि विशेषदर्शनं हेतुमते ग्पुरुषस्याद्दिलौकिकप्रत्यक्षसामग्र्यास्तथाविधदशाद्दबोधादिप्रतिबं
धकतायां विशेषदर्शनवैशिष्ट्यं निवेशनीयं । अन्यथा ताद्दशप्रत्यक्षजनकीभूतलौकिकसन्निकर्षादिसत्वेया
ग्युनासंशयादिसत्वे विशेषदर्शनासत्वेदशाद्दबोधानुदयप्रसंगात् । तथा च विपरीतज्ञानभिन्नकालेताद्दशा
प्रत्यक्षोत्पद्यमाने तथाविधदशाद्दबोधापत्तिवारणाय विपरीतज्ञानाभावनिवेशयाविशेषदर्शनमपि
वेशयप्रत्यक्षसामग्र्याःप्रतिबंधकत्वान्तरं कल्पनीयं । अन्मते तु विशेषदर्शनेमानिवेशयेकमेवप्रतिबंधकत्वं
कल्प्यं इति लाघवमिति चेन्न । अन्मतेपि विशेषदर्शनादिकमानिवेश्ये [redacted] कप्रतिबंधकतायाएवक
ल्पनीयत्वात् । उपदर्शितस्थले भवन्मते बुभ[redacted]पिदशाद्दबोधानंगीकारात् । किन्तु ताद्दशप्रत्यक्षसंशयएव या।
तत्रापेयते । अथवालौकिकप्रत्यक्षस्यानेविशेषदर्शनादिहेतुत्वम[redacted]पिनापेयते तु तेलौकिकप्रत्यक्षसा या।
मग्र्याप्रतिबंधकतायां भवन्मते विशेष एव उपनीतमानसामग्र्यास्तुविशेषदर्शनं विपरीतज्ञानाभा
वो [redacted] निवेश्यंप्रतिबंधकताद्वयं नाशंकनीयं । तस्याःस्वभावतोदुर्बलता[redacted]इच्छासत्वे विशेषदर्शनादि
सत्वासत्वयोरविशिष्टकरतयातदनिवेश्यैव प्रतिबंधकतायाएव कल्पनात्तस्मात् विशेषदर्शनहेतुताम

२ पश्च[redacted]कूपश्यकू२

२ याः इच्छाविशिष्टत्वेनैव विरोधितया

तेतथाविधमानसेतथाविधयाद्दशसामग्र्याःप्रतिबंधकताकल्पनेनलाघवंदुष्परिहरमेव।अथघटादिमानसंप्रति
ग०वा० ताद्दशसामग्र्याःप्रतिबंधकत्वेकल्पनीयेविषयमनिवेश्यमानसत्वस्यैवप्रतिबध्यतावछेदकत्वोपगमात्त
नएवोपपत्तौअयंपुरुषइत्यादिमानसेनायंपुरुषइत्यादिज्ञाद्दशसामग्र्याःप्रतिबंधकत्वमनवछिन्नं।ननुघट
१९ मानसंजायतामित्याकारकविषयमिष्टिेच्छानात्तुतेजकत्वानुरोधेनाविशेष्यघटमानसादिकमेवप्रति
बध्यतावछेदकंवाच्यं।तथाचकथमेकप्रतिबंधकतयोपपत्तिरितिवाच्यं।सामग्रीकालीनज्ञानेछायाःहेतु
त्वोपगमेनेछायाउत्तेजकत्वानभ्युपगमात्।सामग्र्यनुत्तेज[illegible]त्वस्यैवसामग्र्यभावजन्यतावछेदकत्वोपग
मादिछाकालीनज्ञानेसामग्र्यभावस्यव्यभिचाराभावात।नन्वेवमपिताद्दशसामग्रीकालीनज्ञानेदृ
त्वावछिन्नविशेष्यकपुरुषत्वादिमानसेछायाहेतुत्वमेवाधिकमितिवाच्यं।विरोधिधयानुमितिसाम
ग्र्युत्तरकालीनतथाविधमानसेताद्दशेछायाहेतुत्वकल्पनीयेतस्यैवताद्दशसामग्रीविशेष्यमनिवेश्यत
तथाविधमानसेछाविशिष्टमानसत्वस्यैवताद्दशेछाजन्यतावछेदकत्वोपगमात्ताद्दशकारणतायाउपाय
पत्तेस्तथाविधत्वाद्दसामग्रीकालीनमानसेछाहेतुत्वांतरकल्पनादिति।चेदेवमपिविशेषदर्शनहेतु
तामतेपिगौरवानकाराः।अनुमितिस्थलीयपरामर्शहेतुनयैवोपपत्तौविशेषदर्शनहेतुतायाअति

करादि त्वा

रिक्तत्वाभावात् । न च पुरुषत्वव्याप्यैकरादिमांश्चायमित्येतादृशज्ञानद्वयादिहेतुताकल्पनमधिकमिति
वाच्यं पुरुषत्वव्याप्यस्याकरादिरत्याकारकापत्तिरात्मकज्ञानेतादृशव्याप्तिज्ञानस्यायं करादिमानस्यादित्येता
३१ दृशापत्तौ चायं करादिमानित्यादिज्ञानस्य व्यतिरेकनिर्णयपुरुषत्वया हेतुत्वकल्पनीयेतादृशापत्तित्वादिकमु
निवेश्य तादृशनिर्णयविशिष्टप्रत्यक्षत्वस्यैवजन्यतावच्छेदकत्वोपगमात् तादृशकारणताद्वयेनैवोपपत्तेः । तथा
विधज्ञानद्वयादिहेतुताया अप्यतिरिक्तत्वाभावात् । न च तादृशप्रत्येकज्ञानात् तादृशापत्त्युत्पादे पुरुषस्या करादि
धाकारकनिर्णयस्याप्युत्पादप्रसङ्गवारणाय तत्र तादृशव्याप्तिज्ञानद्वैशिष्ट्यकरादिमत्तानिर्णयादिनैव हेतु त्वा
त्वं वाच्यं । तच्चाधिकमेवेति वाच्यं । तादृशकारणद्वयस्य प्रत्येकतया विधापत्त्युत्पादकत्वोपगमेऽपि प्रत्येकस्य
ले दण्डचक्रादिवन्मिलितस्यैव फलोपधायकत्वोपगमेन प्रत्येकं ज्ञानात् तादृशनिर्णयापत्त्यभावात् । न च ता
दृशापत्तिस्थलीयकार्यकारणभावे तादृशनिर्णयाव्यवहितोत्तरत्वनिवेशादेव गौरवमेतन्मते । मन्मते तादृ
शव्याप्यभावादिगोचरापत्तित्वस्य जन्यतावच्छेदकत्वेनैवोपपत्तेः तादृशनिर्णयाव्यवहितोत्तरत्वानिवेशा
दिति वाच्यं । भवन्मतेऽव्याप्यभावाभाववत्तिस्याधाकारकबाधजन्यापत्तौ व्यभिचारवारणाय तादृशाव्यव
हितोत्तरत्वनिवेशावश्यकत्वात् । एवं च विपरीतज्ञानानुत्तरप्रत्यक्षे विपरीतज्ञानाभावस्यापत्तिचारकका
रणतायाः आधिक्याद्गौरवमित्यपि नाशङ्कनीयं । तादृशा हेतुता कल्प्यते ना यं पुरुषस्या दिशा

१०वा० ष्टसामग्रीप्रतिबंधकतायां पुरुषत्वाभावादिप्रकारकयोग्यताज्ञानानिवेशो लाघवात् । तथाहि । ताद्दशयोग्यताज्ञा
नशून्यकालीनेतरसकलकारणसमवधानकालीनप्रत्यक्षादौ व्यभिचारस्य सामग्र्यनुत्तरत्वनिवेशनेन वारि
तत्वात् तन्मते च ताद्दशयोग्यताज्ञानानिवेशनात् तदनिवेशे योग्यताज्ञानकालीनेतरसकलकारणसमवधानकालीनप्र
२० त्यक्षादौ तथाविधसामग्र्यभावात् जन्यतावच्छेदकानाक्रान्ततया योग्यताज्ञानादिघटितत्वाद्दृष्टसामग्रीकाले
तदापत्तिः स्यात् कारणीयमन्मते तु कार्यतावच्छेदककोटौ विषयमनिवेश्य पुरुषत्वाभावप्रकारकज्ञानानुत्तरज्ञान
त्वावच्छिन्नप्रति ताद्दशज्ञानाभावत्वेन हेतुताकल्पनात् ताद्दशयोग्यताज्ञानशून्यकालीनाखिलज्ञानानामेता
द्दशकारणजन्यतावच्छेदकाक्रान्ततया ताद्दशयोग्यताज्ञानद्वारा याचेमाद्दशकारणाविरहेणैव नताद्दशसा
यां×ज्ञान मग्रीप्रतिबंधकतायां योग्यताऽनिवेशनमिति । न च चाक्षुषविपरीतज्ञानानुत्तरत्वं चाक्षुषादौ ताद्दशविपरीतज्ञा
नाभावहेतुत्वमेवाधिकमित्याशंकनीयं । भवन्मतेऽपि चाक्षुषविपरीतज्ञानोत्पत्तियाधमुत्वस्य चाक्षुषादौ विशे
षरूहेतुतायाः स्वीकरणीयत्वात् । न च भवन्मते चाक्षुषविपरीतज्ञानानुत्तरत्वस्य जन्यतावच्छेदककोटिप्रविष्टत्वा
गौरवमिति वाच्यं । भवन्मतेऽपि प्रतिबंधकतावच्छेदककोटौ तेन रूपेण निवेशस्यावश्यकत्वात् प्रामाण्यग्रहाभा
वादिभिः सह तस्य विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवात् । एवं माद्दशयोग्यताज्ञानेव्यभिचारवारणाय तदा
याः उत्तेजकत्वकल्पनायां तदा भवन्मतेऽपि विपरीतज्ञानोत्पत्यनुत्तरत्वस्य कार्यतावच्छेदकत्वमुपपादितमेव

वंत्वेभयत्रनिर्णयत्वनिवेशेनगौरवंभवन्मतेएवाधिकमितिकृतमधिकेन।वन्ह्यादिविशिष्टबुद्धौवन्ह्याद्य
त्यन्ताभावत्वमात्रानवच्छिन्नमद्धताज्ञानस्यापिविरोधितावाच्या।एवंपर्वतोवन्ह्यभाववानित्याद्यौनिर्ण
यवत्पर्वतेवन्ह्यभावइत्यादिनिर्णयस्यापिविरोधित्वमेस्तनीयं।वन्ह्यभावविषयतावच्छिन्नपर्वतविषय
तावच्छिन्नपर्वतविषयताशालित्वेनाद्विविधनिर्णयावनुगमय्यैकप्रतिबध्यकताकल्पनंपुनरनुपादेयमेव।
अन्योन्यविधाप्रामाण्यज्ञानानास्कंदितजन्यत्वानुरोधेनपृथक्प्रतिबंधकतायाआवश्यकत्वात्।संयोगादिना
वन्ह्यादिविशिष्टबुद्धौवन्हिसंयोगात्यन्ताभावादिमत्ताज्ञाननिर्णयस्यापिविरोधितावाच्या।तादृशनिर्णये
रायामपितथाविधनिर्णयस्तत्तादृशानुभवसिद्धत्वात्।नव्यास्तु।तादृशविशिष्टबुद्धौतथाविधनिर्णयस्य
विरोधित्वमानाभावः।यथाभावाननुबंगाद्धिहात्।अन्यथावन्हिसंबंधसंबंधाभाववत्ताज्ञाननिर्णयादीनामपिवि
रोधित्वापत्तात्।नतुसंयोगादिसंसर्गकवन्ह्यादिविशिष्टबुद्धौवन्हिसंयोगाभावादिनिर्णयाविरोधित्वंमा
थिकंकिंतुवन्हिसंयोगादिविशिष्टबुद्धौतत्प्रतिबंधकत्वकल्पनीयेवन्हिप्रकारतावच्छिन्नसंयोगीयविषय
तावच्छिन्नपर्वतविशेष्यताशालिज्ञानत्वादेरेवतत्प्रतिबध्यतावच्छेदकत्वोपगमात्संयोगादिसंसर्गकविशि
ष्टबुद्धेरपितदाक्रान्ततयातादृशाप्रतिबंधकतयेवनिर्वाहादितिवाच्यं।समवायाद्यवच्छिन्नप्रतियो

बा० बा० व गिताकवह्निसंयोगात्यंताभाववत्तानिर्णयदशायां कालिकसंबंधेन तद्विशिष्टबुद्धेर्व्यभिचारवारणा
यसमवायादिसांसर्गिकविषयतायाः प्रतिबध्यतावछेदककोयवेश्यंनिवेशनीयत्वात्। संयोगादिना
२१ वन्ह्यादिविशिष्टबुद्धेः समवायात्मकसंबंधसंबंधानवगाहितया ताद्दशप्रतिबध्यतावछेदकानाक्रांतत्वात्
न च कालिकादिविशिष्टसंबंधेन संयोगादिविशिष्टबुद्धेर्व्यभिचारवारणाय समवायादिसंसर्गकत्ववि
शिष्टबुद्धेर्न निवेशनीयं किंतु समवायाद्यन्यतमावछिन्नप्रकारतान्यत्वं संयोगविषयताया निवेश्यं। तच्च संयो
गादिसांसर्गिकविषयतासाधारणं। अतो न संयोगादिसांसर्गिकविशिष्टबुद्ध्यसंग्रह इति वाच्यं। समवा
यादिसंसर्गकत्वनिवेशापेक्षया ताद्दशप्रकारतान्यत्वनिवेशे गौरवात्। तत्संसर्गाभाववत्तानिर्णयदशा
यां तत्संसर्गविशिष्टबुद्धिस्वीकारे क्षतिविरहेण ताद्दशगौरवसाहिष्णुतायाअनुचितत्वादित्याहुः।
अत्र च यदा वह्निसंयोगात्यंताभावावछेदेन संयोगादिसंसर्गावछिन्नप्रतियोगिताकवन्ह्यभा
ववत्ता यत्र तदा पर्वतत्वावछेदेन वह्निसंयोगाभाववत्पर्वतो वह्निमानित्यादिविशिष्टबुद्धेरनु
त्पादः सर्वसिद्ध एव। तदुपपत्तये च तन्मते ताद्दशविशिष्टबुद्धौ वह्निसंयोगाभाववत्त्वान्वन्ह्यभाववत्ता
निति ज्ञानविशिष्ट्यं निवेश्य वह्निसंयोगाभाववत्पर्वतोन्यस्याकारकनिर्णयस्यावछेदकत्वमेव दर्शं

नविषयताविरोधिताकल्पनीयातदपेक्षयातादृशज्ञानवैशिष्ट्यमानिवेश्यप्रतिबंधकत्वकल्पनमेवोचि
तमितिविभावनीयं।धूमस्यादिविशेष्यकबुद्धौवह्न्यभावादिनिर्णयवद्वह्न्यभावादिविशेष्यकबुद्धौवह्न्या
दिनिर्णयस्यापिविरोधित्वमपिबोध्यं।तत्रशुद्धवह्नित्वावच्छिन्नसंयोगावच्छिन्नप्रतियोगिता
काभाववत्ताज्ञानत्वेनतत्प्रतिबध्यतासंयोगादिसंसर्गकवह्निमत्तानिर्णयत्वेनप्रतिबंधकता।तन्नि
र्णयत्वंशुद्धवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रकारकत्वमतोनमहानसीयवह्न्यभाववान्व
ह्निमान्पर्वतइत्याकारकज्ञानासंग्रहः।नन्वेवंमहानसीयवह्निमान्वेतिसंशयस्यापिविरोधिता
पत्तिरितिवाच्यं।तादृशाभावप्रकारकशुद्धवह्नित्वावच्छिन्नप्रकारताशालिज्ञानत्वेनविरोधित्वात्
नन्वेवंमहानसीयवह्निमान्पर्वतइत्याकारकनिर्णयकालेवह्न्यभाववान्पर्वतइत्याकारकज्ञानापत्ति
रितिवाच्यं।तादृशनिर्णयस्यपृथक्प्रतिबंधकताभ्युपगमात्।अप्रामाण्यज्ञानानास्कन्दितानुरोधेनत
स्यपृथक्प्रतिबंधकत्वमावश्यकमेवतादृशसकलनिर्णयानामेकप्रतिबंधकत्वेमहानसीयवह्न्यभाव
वतिमहानसीयवह्नित्वावच्छिन्नप्रकारकमित्याकारकनानाविधाप्रामाण्यग्रहाभावानामेकत्रनिवेश
नीयतापत्त्यामहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभाववतिमहानसीयवह्न्यभावच्छिन्न

प्रकारकाप्रामाण्यग्रहकालीनस्य पर्वतो वह्निमानित्यादिनिर्णयस्याविरोधितापत्तेः। वस्तुतस्तु। वह्नित्वावच्छि
बा०बा० न्नाभाववद्बुद्धौ मलानसीयवह्नित्वावच्छिन्नप्रकारकज्ञानस्य प्रतिबंधकतापत्तिरिति न कल्प्यते। मलानसी
बुद्धि यवह्नित्वावच्छिन्नाभाववत्स्थलीयत्वादृशनिर्णयप्रतिबंधकत्वोपपत्तेः। तथाहि। तादृशनिर्णयस्य प्रतिबध्यतावच्छे
२२ दकं न मलानसीयवह्नित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन मलानसीयवह्नित्वावच्छिन्नप्रकारकाभाववद्बुद्धि
त्वं प्रवेशणादिव्यतिरेकविशिष्टमलानसीयवह्न्यभावादिप्रतियोगिताया अपि मलानसीयवह्नित्वावच्छिन्नत्वात् प्र
वेशणादिव्यतिरेकविशिष्टमलानसीयवह्न्यभाववानित्याकारकस्यापि तत्प्रतिबध्यतापत्तेः। अतो मलानसीयत्वादिरिक्त
यद्वह्नित्वादिरिक्तस्वावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नवह्निप्रकारतावच्छिन्नाभावप्रकारताशा
शुद्ध लिज्ञानत्वमेव तथा वाच्यं। एवं च वह्नित्वावच्छिन्नप्रतियोगितासंसर्गकवन्ह्यभाववान् पर्वत इत्यादिज्ञान
स्यापि तादृशधर्माक्रांतत्वमिति। एतन्मते पर्वतो वह्निमान् वह्निमानित्यादिज्ञानानामेकप्रतिबंधकतानिर्वा
हाय तत्साधारणत्वं निर्णयत्वं निवेशकमात्रं व्यामोहाच्च यथावस्थमवगन्तव्यं। बाधादिनिर्णयवत्तज्ज
न्यविशेषदोषविशेषसन्निकर्षविशेषाणामपि प्रतिबंधकत्वं सत्वेनापि। अन्यथा पर्वतो वन्ह्यभाववानि
त्याकारकप्राथमिकनिर्णयोत्पत्तिकाले वन्ह्यादिविशिष्टबुद्ध्यापत्तेः। बाधनिर्णयाभावस्य प्रागसत्
त्वात्। यत्तु। बाधनिर्णयाभावस्य कार्यसहभावस्यानैवंहेतुत्वोपगमान्न बाधनिर्णयोत्पत्तिकाले

विशिष्टबुद्ध्यापत्तिरिति । नत्वयं नमसत् । नदर्शितां च नकिं विशिष्टबुद्ध्युत्पादे वन्ह्याद्यप्रकारकवन्ह्यभावादिप्रका
रकत्वरूपस्य धर्मिनिर्णयत्वावच्छिन्नस्यैवानिश्चायकत्वेन तदानीं तादृशाप्रतिबंधकसमवधानस्य कार्यानुत्पादाधीन
त्वात्तस्य तदानीं कार्यानुत्पादप्रयोजकत्वे अन्योन्याश्रयापत्तेः । न तस्य योजकप्रतिबंधकान्तरकल्पनायां आव
श्यकत्वात् । कार्यानुत्पादाधीनस्य कार्यानुत्पादप्रयोजकत्वेनाप्युपगमेनैतत्सर्वं तु कार्यासत्त्वे धिकरणक्षणा न
वच्छिन्नस्वक्षणवृत्तित्वविशिष्टत्वेन प्रतिबंधकत्वसंभवेन एककारणपरिशेषापत्तेः । तद्धर्मावच्छिन्न
विशेष्यताकत्वेनैव किं कान्यतादृशिष्टबुद्धौ तदभावव्याप्यवत्ताज्ञानत्वेनाभावच्छेदकज्ञानयोरपि बाध
बुद्धिं प्रतिबंधकतानतदभावव्याप्यवत्ताज्ञानस्य च तत्तावच्छिन्नविशेष्यताकत्वं किं कान्यस्थाणुत्वा
दिप्रकारताशालिज्ञानत्वावच्छिन्नं प्रतिकरत्वावच्छिन्नविशेष्यताकस्थाणुत्वाभावव्याप्यत्वप्रकारकनिर्णयविशेषत्वे स्थाणुत्वं
त्वावच्छिन्नविशेष्यताकत्वावच्छिन्नप्रकारताशालिनिर्णयत्वेन प्रतिबंधकतानन्तु स्थाणुत्वाभावव्याप्यत्वावच्छि
करादि न्नकरादिप्रकारताशालिनिर्णयत्वेन स्थाणुत्वाभावव्याप्यकरादिमान् अयमित्यादिज्ञानद्वयदशायां तादृ
शसमूहालंबनदशायां चायं स्थाणुर्नवेति संशयापत्तेः । विशेषतस्तु स्थाणुत्वाभावव्याप्यत्वावच्छिन्नकरादिप्र
कारताशालिनिर्णयत्वेनापि प्रतिबंधकत्वान्तरकल्पना तादृशज्ञानद्वयसाधारणप्रतिबंधकतायां च करत्वा
तिरिक्तधर्मप्रकारत्वानिरूपितस्थाणुत्वव्याप्यकरादिप्रकारतायामवश्यं निवेशनीय इत्यतो तादृशप्रतिबंधकतायां विशे च

ज्ञानासंभवात्। तदनिवेशे स्थाणुत्वाभावव्याप्यंकरादौस्याकारकनिर्णयविशिष्टस्यतत्करादिमान्नवेतिसं
प्री०वा० शयस्यापिप्रतिबंधकतापत्तेः। करवान्नतत्कराभाववान्वायमित्यत्राहृद्यानिर्णयसत्यत्रायमुद्धकरत्वावच्छि
२३ न्नाभावप्रकारकत्वरूपनिर्णयत्वस्यैवनिवेशान्नोपपत्तिः। नोहृद्याऽभावप्रकारकत्वस्यैवतथाविधसंशयसा
धारणत्वात्तथाविधसंशयसाधारण्यायकरत्वातिरिक्तयत्तदभावव्याप्यत्वातिरिक्तेनधर्मप्रकारत्वानिरूपितत्वे
कारादिप्रकारतायानिवेश[illegible]। ज्ञानद्वयस्थलीयप्रतिबंधकतावच्छेदकस्यस्थाणुत्वाभावव्याप्यकरवा
नित्याकारकज्ञानस्यसंसाधारण्योपपादनेऽप्रामाण्यज्ञानानुत्तेजकानुरोधेनप्रतिबंधकत्वमावश्य
कं। अन्यथास्थाणुत्वाभावव्याप्यत्वविशिष्टैककरत्वावच्छिन्नधर्मप्रकारताशालिज्ञानमप्रोक्तकरत्वावच्छिन्न
प्र प्रकारताशालिज्ञानमेवमेत्याकारककज्ञानाविधाप्रामाण्यज्ञानानामेकत्वोत्तेजकत्वापत्त्याज्ञानद्वयादि मा
कालेतथाविधविशिष्टधर्मावच्छिन्नप्रकारताशालिज्ञानमेवमप्रामाण्यज्ञानसत्वेऽयंस्थाणुर्नवेतिसंश
यापत्तेः। एवंचस्थाणुत्वाभावव्याप्यकरादिमानित्यादिज्ञानानामपिप्रतिबंधकत्वमस्येवसंशयत प्र
दभावावच्छेदकधर्मश्चायंस्तद्धर्मेनैतत्संभवोऽप्रतीतेस्तज्ज्ञानस्यचकराद्यवच्छिन्नविशेष्यताकस्था
णुत्वाद्यभाववत्तानिर्णयविशिष्टत्वावच्छिन्नविशेष्यककरादिमत्तानिर्णयत्वेनविरोधिताऽवच्छेदकस्य

तावच्छेदकसामानाधिकरण्यावगाहिकरादिमान्न स्थाणुरित्याकारकानिर्णयस्थानीयकरादिमत्ताज्ञानस्य
स्थाणुत्वादिविशिष्टबुद्धिविरोधित्व याकरा धृवाछिन्नविशेषणतासंसर्गकत्वमपि तदभावनिर्णयोनि
वेशनीयं स्थाणुत्वावच्छिन्नाभावावच्छेदकीभूतकरादिनां तदभावव्याप्यत्वेपि करादिमान्न स्थाणुरित्याकारकानि
र्णयकालीनकरादिमत्ताज्ञानस्य तदभावव्याप्तिनिर्णयविशिष्टकरादिमत्तानिर्णयत्वेन तदभावव्या
प्यवत्तानिर्णयप्रतिबंधकतावच्छेदकधर्मानाक्रान्ततयाऽवच्छेदकधर्मे दर्शनस्य प्रतिबंधक

करादि

त्वाभावात्पक्षमिति ध्येयं स्थाणुत्वाद्यभावव्याप्यकरादिमान्न स्थाणुरित्यादिज्ञाने तु यज्जन्यतथावि
धोद्बुद्धसंस्कारसत्वेऽपि करादिमानित्याकारकज्ञानस्य स्वसत्वेऽपि धियःस्थाणुर्नवेति संशयादे
र्नोत्पद्यते तदा तादृशोद्बुद्धसंस्कारसत्तादशायां तथाविधज्ञानस्यापि प्रतिबंधकत्वमस्तुपर्य
अथवा बोधकाभावविशिष्टसंस्कारान्यतदभावव्याप्यवत्तादिविषयकविशिष्टकरादिमत्ता
ज्ञानत्वेनैव प्रतिबंधकत्वं कल्पनीयाभेदस्याप्युद्धातित्वोपगमात् उद्बोधकदशायां उद्बोधका
भावविशिष्टसंस्कारभेदस्य संस्कारसत्वान्नानुपपत्तिः तदभावव्याप्यवत्तानिर्णया घनन्त
रमिव तदुत्पत्तिदशायामपि तद्विशिष्टबुद्ध्यनुदयात् तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभाव

व्याप्यवत्तानिर्णयसामग्र्याः स्वव्यतिप्रतियोगिकत्वसंबंधेन क्षतिविशिष्टस्य तादृश्यानिर्णयप्रागभावस्ये
बा०वा० वप्रतिबंधकता कल्पनीया। यत्तु। तदभावव्याप्यवत्ताऽनिर्णयाधभावस्य कार्यकालवृत्तितया हेतु
२४ तोपगमात् तनतदुत्पत्तिकालतद्विशिष्टव्याप्तिरिति तदसत्। अप्रामाण्यग्रहास्कंदितनतदभा
वव्याप्यवत्तानिर्णयाधनंतरं तद्विशिष्टस्योत्पत्तये अप्रामाण्यज्ञानोत्तेजकताया आवश्यकत्वादप्रा
पितानमप्रेत्यप्रामाण्यग्रहोदितापगमेन तदभावव्याप्यवत्तानिर्णयादिस्पष्टतेन दानीं त
द्विशिष्टस्य व्याप्तेः। कार्यकाले अप्रामाण्यग्रहाभावविशिष्टतदभावव्याप्यवत्तानिर्णयाधभाव
स्येव तत्कारणायसाम्य्योप्रतिबंधकताया आवश्यकत्वे कार्यकालीनव्याप्तितयानिर्णयाधभाव
हेतुतायाः निष्फलत्वात्। एवमप्रामाण्यज्ञानानास्कंदितनतदभावव्याप्यवत्तानिर्णयाधभा
वस्य कार्यसहभावेन हेतुत्वेन यत्र भा[illegible] विज्ञानमप्रेत्यप्रामाण्यज्ञानानंतरं तदभावव्याप्य
वत्तानिर्णयाऽस्मिन्नंतरं तद्विशिष्टस्य प्रत्यक्षस्य प्रसंगः। कार्यकाले अप्रामाण्यग्रहनाश्रेन्या
प्रामाण्यग्रहाभावविशिष्टतदभावव्याप्यवत्तानिर्णयाभाव[illegible]यानिति तदभावव्याप्यवत्तदभावाव स
वच्छेदकधर्मवत्ताज्ञानीयविशेष्यतावच्छेदकमिवनदभावादिकमपिविशेष्यतावच्छेदकसत्यनाश

येतादृशविशिष्टबुद्धिर्नोत्पद्यते तत्कारणाय तु वन्ह्यभावावच्छिन्नविशेष्यतानिरूपितवन्हित्वावच्छिन्न
प्रकारताशालिज्ञानत्वावच्छिन्नं प्रति तादृशप्रकारताशालिज्ञानगोचरेच्छाविरहविशिष्टवन्ह्यभा
वोपस्थितित्वेन प्रतिबंधकताकल्पनीया । तादृशविशेष्यताशालिज्ञानं चेत्तादृशज्ञानगोचरेच्छा तदा
धर्मेव प्रसिद्धं न च वन्ह्यभावोपस्थितिरूपप्रतिबंधकस्यैतत्कालेनाभावज्ञानापत्तिरिति वा
वा च्यं । विशेषणज्ञानविरहात् । अथैतादृशेच्छाभावविशिष्टोपस्थितित्वेन तादृशाभावविशि
ष्टत्वेन वा प्रतिबंधकत्वं कल्प्यते । नव्यास्तु तादृशज्ञानं प्रति तथाविधेच्छात्वेन हेतुत्वकल्पने
नैवोपपत्तौ न तादृशाभावविशिष्टवन्ह्यभावोपस्थितेः प्रतिबंधकत्वकल्पनमनर्थकं । अथ व
न्ह्यभावावच्छिन्नविशेष्यतानिरूपितवन्हिप्रकारताशालिप्रत्यक्षं जायतामित्याकारेच्छात्वेन तादृशप्रत्य
क्षत्वेन कार्यकारणभावो न संभवति । तादृशेच्छाविनापि वन्हिप्रकारतानिरूपितवन्ह्यभावावच्छि
त्तं न्नविशेष्यताशालिप्रत्यक्षं जायतामित्याकारेच्छायां न तादृशप्रत्यक्षस्य व्यभिचारादुभयेच्छयोः

बा०व्या० तादृशविशेष्यताशालिप्रत्यक्षविषयकेच्छात्वेनानुगमय्य हेतुत्वे प्रत्यक्षं जायतामित्याकारकेच्छाया
तादृशप्रत्यक्षाविषयकतया तत्सत्त्वेऽपि निर्वह्नौ वह्निमानिति प्रत्यक्षापादनात् तस्मात्सका
२५ रविशेषनिवेशस्यावश्यकत्वात् । मन्मते तादृशेच्छाभावकूटविशिष्टज्ञानाभावत्वेन प्रका
रणस्य तादृशसकलेच्छाकाले एव सत्त्वान्न व्यभिचारः । न च तादृशेच्छाविशेष्यस्यानुद्
बोधाजन्यतावच्छेदकत्वेन व्यभिचारानवकाशात् । तादृशेच्छाभावकूटविशिष्टज्ञानत्वेन
प्रतिबंधकत्वे तादृशेच्छाभावानां परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेणा
नंतप्रसंगात् । अथ तादृशेच्छाविरहविशिष्टवह्न्यभावाद्युपस्थितेरभावस्य तादृशेच्छा
याश्च याप्रत्यक्षस्य तत्र एव कृतत्वात् निर्वह्नौ वह्निमानित्याकारकानुमित्युत्पादे बा
धकाभावेन च तादृशानुमित्यादेः सत्ताकतया पाद्यकाभावः निर्वह्नौ वह्निमान्व्या
प्यवानित्यादिपरामर्शो हेतुकारणतायाः एवाकूतत्वादिति वाच्यं । घटमा

वद्वान्वह्निव्याप्यवानित्यादिपरामर्शस्य घटाभाववान्वह्निमानित्यनुमितिं प्रति हेतुत्वेक
त्यनोपेतत्वे च घटादिकमनिवेश्य वह्निविधेयतानिरूपितविशेष्यतानिरूपिताया अभा
वत्वावच्छिन्नावच्छेदकताकतन्निरूपितायाः प्रतियोगितासंसर्गावच्छिन्नावच्छेदकताकस्वछे
दकत्वसंबंधेनानुमितिं प्रति वह्निव्याप्यप्रकारतानिरूपितविशेष्यतानिरूपिताया
भाववत्वावच्छिन्नावच्छेदकताकतन्निरूपितप्रतियोगितासंसर्गावच्छिन्नावच्छेदकतावच्छे
दकत्वसंबंधेन परामर्शस्य हेतुत्वकल्पनान्निर्वह्निर्वह्निव्याप्यधूमवानिति परामर्शा
स्यतादृशप्रत्यासत्त्या वह्नित्वसत्वेन तादृशकार्यतावच्छेदकप्रत्यासत्त्यानुमितित्वावच्छिन्नापत्त्यैव
निर्वह्निर्वह्निमानित्येतादृशानुमित्यापत्तिः। एतदनुरोधेन घटादिकं निवेश्य आत्मनिष्ठप्रत्यास
त्त्या हेतुत्वोपगमे वह्निमानभाववव्याप्यवानित्याकारकपरामर्शकाले वह्निमानभाववानि
त्यनुमितावुक्तधर्मानामापभाववत्त्वप्रतियोगितासंबंधेन वह्निमत्वेनाधवभिमितित्वाध
वत्वान्वत्वाद्भावप्रतियोगितासंबंधेन वह्निमानेबाधकाभावाद्वह्निमान्निर्वह्निरि

स्येतादृशानुमितिर्दुर्वारैव । अत्र केचित् । वह्नित्वावच्छिन्नप्रकारताऽनिरूपितविशेष्यत्वीयाभावत्वा
बा०वा० वच्छिन्नावच्छेदकतातन्निरूपितप्रतियोगितासंसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वसंसर्गेणा
२५ परोक्षज्ञानत्वावच्छिन्नं प्रति वह्नित्वप्रभेदस्य हेतुत्वोपगमान्न निर्वह्निर्वह्निमानित्याद्यनुमि
त्यापत्तिः । वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकत्वप्रत्यासत्त्या तद्वच्छेदक
त्वप्रत्यासत्त्या चैतादृशाज्ञानं प्रति वह्न्यभावप्रभेदस्य वह्नि[illegible]भेदस्य वा हेतुत्वेऽपि घटाभाव
वान् इति वह्न्यभावीयविशेष्यतावच्छेदकीभूतस्य घटत्वादिना वह्नित्वविशेष्यतावच्छेदकीभूतस्य
वा वह्निमत्त्वज्ञानानुदयप्रसङ्ग इति तदुपेक्षितं । वह्नित्वावच्छिन्नत्वं च किञ्चिद्धर्मानवच्छिन्न
वह्नित्वस्य वच्छेदकताकत्वं । एवं प्रतियोगितावच्छेदकनिष्ठावच्छेदकत्वमपि तन्निरवच्छिन्नं
न ग्राह्यं । तेन जातिविशेषत्वादिना वह्नित्वादिकं विषयीकृत्य जातिविशेषवदभाववान् वह्नि
मान् वह्न्यभाववान् जातिविशेषवद्भाववान् वा इति ज्ञानानुदयप्रसङ्गः । परोक्षत्वनिवेशात्
तादृशाहार्यप्रत्यक्षे व्यभिचारः । एवं वह्निमान् निर्वह्निरित्येतादृशाज्ञाने चारणाय व

न्हित्वावच्छिन्नप्रकारतानिरूपिताया अभाववत्त्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदक
तावच्छेदकत्वसंबंधेन परामर्शानत्वावच्छिन्नं प्रत्यपि चान्हित्वमेदत्वादिना हेतुता कल्पनीयेत्य
प्याहुः । यत्तु तत्तद्वन्ह्यभाववान्वन्हिव्याप्यवानित्याकारकज्ञानस्यानाहार्यस्यानभ्युपगमात्
तादृशपरामर्शस्य चानुमित्यहेतुतायाः तादृशाहार्यपरामर्शान्निर्वन्हिर्वन्हिमानित्येतादृशा
नुमित्यापत्तिः । यच्चोक्तं । वन्हिमानभावव्याप्यवानित्येतादृशपरामर्शकाले अभावस्य प्रति
योगितया वन्हिमत्ते लाघवमित्याकारकलाघवज्ञानात् वन्हिमान्निर्वन्हिरित्येनुमित्याप
त्तिरिति । तदप्यसत् । तादृशलाघवज्ञानेन तादृशपरामर्शसहकृतेनेदृशी न्हिरपि फलाज
ननात् तादृशपरामर्शसत्वदशायां रित्वानभ्युपगमात् । किंतु घटवानभावव्याप्यवानित्यादि
२ परामर्शस्यैव तथात्वोपगमात् तादृशपरामर्शादपि तदानीं सत्वे घटवान्वन्ह्यभाववान्व
न्हिमान्नभाववांश्चेत्याकारकानुमितिरेव तादृशलाघवज्ञानजन्यतावच्छेदकावच्छि
न्नाजायते वन्हिमान्वन्ह्यभाववानित्यनुमित्यादिरवीश्वनापत्तिः । तथा विधानुमितित्वस्य

बा०बा० लाघवज्ञानजन्यतावछेदकत्वाभावात् । घटाद्यवछिन्नोद्देश्यतानिरूपिताभावरूपसाध्यविशेष्यकव
न्हिप्रकारकानुमितित्वादेरेव तथात्वात् । अथ विशेष्यतावछेदकतावछेदकनिष्ठप्रत्यासत्त्या हेतु
२१ त्वकल्पे विशेष्यतावछेदकमनियतसाध्याभावव्याप्यवत्ताज्ञानत्वमेव जनकतावछेदकं वाच्यं त
कता दवछिन्नस्य हेतुतस्य लाघवज्ञानस्यैव फलव्याप्यत्वसम्भवे येयं । ननु घटत्वावछिन्नविशे
ष्यतावछेदकाभाववत्त्वावछिन्नव्याप्यवानित्यादिज्ञानमात्रसहकृतस्य तद्रूपस्य जनकज्ञान
वछेदकत्वात् । इत्थं च वन्हिमानभावव्याप्यवानित्यादिज्ञानमात्रसहकृतात् लाघवज्ञाना
दभाववांश्च वन्हिप्रकारकानुमितिर्द्वयोरेवेति । तादृशकार्यकारणभावकल्पनमावश्यकं
तत्कल्पनेन च परस्परसमानाधिकरण्यापन्नकारणतामात्रसिद्धाया वन्हित्वभेदघटि
ताया विषयनिष्ठप्रत्यासत्त्याः कार्योत्पादकसामग्र्या एव तादृशलाघवज्ञानसह
कारित्वापगमात् । प्रकृतस्य तज्जन्यकारणतावछेदकीभूतविषयनिष्ठप्रत्यासत्त्या वन्हित्वभेदेन सह
सामानाधिकरण्यापन्नाभावव्याप्यवत्तापरामर्शभावेनापत्यभावादिति चेत् तर्हि तादृश २१

गुरुतरप्रत्यासत्त्याः कार्यकारणभावकल्पनापेक्षया लाघवाद् घटत्वादिघटितविषयतासंबंधेन ज्ञानं
प्रति घटत्वादीनां तादात्म्यप्रत्यासत्त्या हेतुत्वमेव कल्प्यतां इति यासत्त्याभावस्य वन्हिमति यागि
त्वत्तद्घवमित्यादिज्ञानेन फलजनने घटत्वादिरूपविषयकार्यत्वादिकार्यवन्हित्वभेदस्य व
यत्वादिघटितसामग्र्या एव सहकारित्वोपगमात् । प्रसन्नस्य तद्वत्तद्भाव नेवापत्तिवार
णसंभवात् । अतीतादिविषयकानुमित्यादेश्च तदानीं हेतुत्वासंभवेऽपि तत्र तत्र विषयता
संबंधेन ज्ञानत्वेन हेतुतयैवोपपत्तेः । न च घटत्वपटत्वादिसंदेहानन्तकार्यकारणभावकल्पनापे
क्षया वन्हित्वभेदस्यैकहेतुत्वकल्पनमेवोचितमित्याशंकनीयं । भवन्मते घटाभावादिविषय
कानुमितौ घटत्वादिभेदस्यैव हेतुतायाः अवश्यकल्पनीयतया विरोध्यतावच्छेदक [redacted] सममसं
ख्यकार्यकारणभावकल्पनस्यावश्यकतया साम्यात् । घटत्वादिघटितविषयतासंबंधेना
नुमितौ तादात्म्येन घटत्वादीनां विषयतया तज्ज्ञानस्य हेतुत्वस्यावश्यकत्वमपि वन्ह्या
पि विरोध्यतावच्छेदकताभ्यासात् विचारसहमानाभिः । एवं वन्ह्यभावव्याप्यवान्कि

बा०वा० मानित्याकारकानाहार्यविशिष्टबुद्धिवारणाय प्रकारोऽपि चिंतनीयः। करादीनां स्थाणुत्वाभावव्या
२८ पकत्वग्रहेऽपि करादिविशेष्यतावच्छेदकीभूतस्य स्थाणुत्वविशिष्टबुद्ध्यनुदयात् वारणाय
करत्वावच्छिन्नविशेष्यतावच्छेदकताकस्थाणुत्वादिविशिष्टबुद्धिं प्रति करत्वावच्छे
न्नविशेष्यताकस्थाणुत्वाभावव्याप्तिनिर्णयत्वेन प्रतिबंधकताऽपि वाच्या। अथवा
धत्वेनांकेन संबंधेन प्रतिबंधकता न तावत्समवायेन विशिष्टबुद्धिं प्रति समवाये
नात्मनिष्ठविशेषगुणानामव्याप्यवृत्तितया बाधकालेऽपि तदनवच्छेदकावच्छेदेन
तदभावसत्त्वाद्विशिष्टबुद्ध्यापत्तेः। निरवच्छिन्नविशेष्यतासंबंधेन तदभावबुद्धित्वं
सं पुनरत्यंताभावबुद्धित्वमेव बाधश्चान्यकालेऽपि तत्कालावच्छिन्नविशेष्यतैव बाध्या ये
भावस्य च नैः। देशान्तवच्छिन्नविशेष्यतासंबंधेन तद्धत्त्वान्नदोषः। तथापि बाध न
स्यान्यकालावच्छिन्नविशेषतायामपि शरीरावच्छिन्नत्वादिदानीमतद्ध

शिरावच्छेदेनात्मनि बाधबुद्धिर्नास्तीति प्रत्ययात्। देशत्वस्यानियतक्रमत्वाभावात्। न च काल
बृ। भिन्नत्वेन शरीरादेरपि जन्यतया कालत्वात्। न च कालनिरूपितावच्छेदकताविलक्षणावच्छेदकताया एव
नियामकत्वेन तद्दोष इति वाच्यं। तादृशवैलक्षण्यस्यानियतक्रमत्वाभावात्। एवं कायव्यूहस्थल एकशरीरा
वच्छेदेन बाधबुद्धिसत्त्वे देशान्तरावच्छेदेन विशेषणतया बाधाभावस्य तदात्मन्यसत्त्वात्। अन्यशरी
रावच्छेदेनापि विशिष्टबुद्ध्यनुदयप्रसंगः। न चाप्यवच्छेदकतासंबंधेन विशिष्टबुद्धिं प्रत्यवच्छेदकता
संबंधेन बाधबुद्धेर्नापि तेनैव बाधकता। परपुरप्रवेशस्थले एकात्मनि तच्छरीरावच्छेदेन बाधबुद्ध्या
दिसत्त्वेऽन्यात्मनि तच्छरीरावच्छेदेन विशिष्टबुद्ध्याद्यापत्त्या व्यभिचारात्। एवं यत्र महाशरीरनाशादेशा
[illegible] बाधबुद्धेरनन्तरं खण्डशरीरोत्पत्तिः तदनन्तरं खण्डशरीरावच्छेदेन विशिष्टबुद्ध्यापत्तिः। खण्ड
शरीरावच्छेदकतासंबंधेन बाधाभावसत्त्वात्। न च तत्रानीकयं बाधबुद्धिरूपघातशरीरस्यका
यसंभवेन नानैकदेशात् तदानीं च शरीरविरहादिति वाच्यं। अंत्यावयविनाशमनिवेश्य
शरीरतदवयवनाश्याद्यसाधारणत्वक्षणवृत्तित्ववर्तमानादिना देहतायाः दीधितिकारेणोद्धृतप्र
थत्वीकारात्। तदानीं शरीरावयवावच्छेदेन वर्तमानात्मनो बाधकाभावात्। न च खण्डशरीरस्या

का०वा० ३ पिताद्यज्ञाबाधबुद्ध्यवच्छेदकत्वाभ्युपगमान्नदोषइतिवाच्यं । तथासत्यवच्छेदकतासंबंधेनतदधिकरणी
भूतखण्डशरीरेतदव्यवहितपूर्वक्षणोत्पादतत्संबंधेनवक्षावृत्तोसत्वात् । चैत्रवृत्तेनज्ञानेनकृतायोव्य
भिचारप्रसंगात् । नचोत्पत्तिक्षणावच्छेदेनकार्याधिकरणेतदव्यवहितपूर्वक्षणकारणासत्वमेवव्य
भिचारः खण्डशरीरस्यचमलशरीरनाशोत्पत्तिकालोत्पत्तिकबाधबुद्ध्यवच्छेदकत्वेप्युत्पत्तिक्षणा
२९ न वच्छेदेनतस्यतदधिकरणत्वान्नव्यभिचारइतिवाच्यं । एवमपियत्रखण्डशरीरोत्पत्तिकालएवबा
धबुद्धिस्तत्रमात्रखण्डशरीरस्यतदवच्छेदकत्वाभ्युपगमेव्यभिचारस्यतदनभ्युपगमेचतद
ज्ञानविरहप्रसक्तेर्दुर्वारत्वात् । अपरखण्डशरीरसमयोत्पत्तिकज्ञानस्यखण्डशरीराद्यवच्छेद्यत्वे
पिताद्यज्ञानाव्यवहितपूर्वक्षणावच्छेदेनतत्रकारणतावच्छेदकीभूततादात्म्यसंबंधावच्छि
न्नप्रतियोगिता[illegible]कभेदरूपकारणाभावस्याप्यसत्वान्नव्यभिचारः । कार्याव्यवहितपू
र्वक्षणावच्छिन्नकार्याधिकरणवृत्तिकाभावप्रतियोगितावच्छेदकत्वस्यकारणतावच्छेद
इतिचेत्॥ कत्वेव्यभिचारपदार्थत्वात् । भासत्व्यभिचारः । तथापिखण्डशरीर[illegible]स्यताद्यज्ञा[illegible]नाव्यव
हितपूर्वक्षणावच्छेदेनावच्छेदकतानियामकसामग्र्यनधिकरणत्वात् । तदवच्छेदकत

मनुपपन्नमेव तादृशसामर्थ्यमनधिकरणत्वस्यावच्छेदकत्वोपगमे सर्वत्र तन्नियामकसामर्थ्याकल्पनेनैव
फल्यापत्तेः । यत्तु विशेष्यतावच्छेदकत्वसंबंधेनाविशिष्टबुद्धिं प्रति विशेष्यतावच्छेदकतासंबंधेन
बाधबुद्ध्यादेः प्रतिबंधकता । तत्तत्पुरुषीयत्वस्याप्यवच्छेदककोटौ निवेशो बोध्यः । अन्यथा एक
पुरुषीयबाधबुद्धिदशायामपि पुरुषान्तरस्य विशिष्टबुद्ध्यनुदयापत्तेः । एतत्कल्पे च वि
शेष्यतावच्छेदकांशे वैशिष्ट्यान्तर्भावेन प्रतिबंधकताबाहुल्यं । अत एव पुरुषभेदेन प्रतिबंधकता
बाहुल्यमप्याकरे विशेष्यतावच्छेदकापेक्षया पुरुषाणामल्पतरत्वादिति । तदसत् । तथा सत्यती
तानागततद्धर्मावच्छिन्नविशेष्यकविशिष्टबुद्धेर्विशेष्यतावच्छेदकतासंबंधेन तादृशरूपादावनु
दयप्रसंगात् । तत्र कार्याव्यवहितपूर्वक्षणावच्छेदेन बाधाभावघटितसामग्र्या असत्वात् । न
चैतत्राप्यव्यवहितपूर्वक्षणावच्छेदेन बाधबुद्ध्यसत्वात् । तत्क्षणावच्छेदेन तदभावसत्वे बाध
काभाव इति वाच्यं । तत्क्षणस्यावच्छेद्याधिकरणताद्वारा रूपादिसंबंधितया तादृशरूपादिनिष्ठबाधाभा
न वाधिकरणत्वावच्छेदकत्वात् । न चैवं ज्ञानेच्छादीनां समानविशेष्य[illegible]त्वप्रत्यासत्त्या हेतुत्वकल्प्ये[illegible]ये

तादृशानुपपत्तिरिति वाच्यं तत्रावछेदकत्वमनंतर्भाव्य प्रत्यक्षणैकदेशघटितसामान्याधिकरणं तत्तद्व्यव
छिन्नांतर्लक्षणघटकीछाधिकरणमित्येतादृशसामर्थ्याभ्यासरेवाभ्युपगमस्यानुपपत्यभावात् । नन्वत्रा
पि तादृशरूपवसामर्थ्याभ्यासरूपगतव्युतिवाच्यं । तयासंतिततद्धर्मावछिन्नविशेष्यकबाधबुद्धिकाले
तद्धर्मावछिन्नविशेष्यकाविशिष्टबुद्ध्यापत्तेः । अत्यंताभावस्य सदा तन्नतयाता दृशबाधबुद्धिक्षणेपि
तदत्यंताभावस्य वर्तेस्तत्तत्क्षणघटितबाधाभावघटितसामर्थ्याला दृशरूपादेसत्वात् । निरवछिन्नवि 
शेष्यतावछेदकस्यैतद्विशेष्यतावछेदकताप्रत्यासत्तिरवछिन्नरूपादिविशेष्यतावछेदकताकस्य
तत्तद्रूपत्वादिनिष्ठविशेष्यतावछेदकतावछेदकसंमेव प्रत्यासत्तिरिति नानुपपत्तिरिति वाच्यं ।
एवमप्यतीतरूपाद्यात्मकतत्ताय च स्वरूपतो विशेष्यतावछेदकतानिशायां विशेष्यतावछेदक
तायाश्च प्रत्यासत्तित्वसंभवेन तादृशानुपपत्तितादवस्थ्यादिति । मैवं । समवायेनाविशिष्टबुद्धि
प्रति समवायेन बाधविशिष्टसाहित्येना प्रतिबंधकता । बाधविशिष्टत्वं च सामानाधिकरण्य
संबंधेनकाबाधकालेऽन्यावछेदेन तदभावसत्वेपि सामानाधिकरण्यसंबंधेन तादृशि

ष्याप्यत्तेरपि संभवान्न तद्विशेषाभाव इति नानुपपत्तिः ॥ कायव्यूहस्थले चान्यशरीरावच्छेदेन त
दात्मनि बाधादिसत्त्वेऽन्यशरीरावच्छेदेनापि न तद्विशेषबुद्धिरूपं यत्तदुत्पादे प्रमाणविरहा
त् । तादृशफलस्य प्रामाणिकत्वे तु अनायत्यान्वेवादिशरीरावच्छिन्नत्वं बाधादौ विशेष्यबुद्धौ
३१ ऽपि विशेषणं देयमिति ॥ ॥ इति श्रीहरिरामतर्कालंकारविरचितो बाधबुद्धिप्रतिबं
धकताविचारः समाप्तिमगमत् ॥ ॥ ७ ॥ ॥ ७

बाधनुद्धि.श्रातिबंधकतावि चारसमाप्तः।
स्वामिहि.श्रितरः